स्मृति नं० ७१०-घ

एकादशीतत्त्वम् (धर्मशास्त्रम्) ८५ पत्र नहीं

नं० ७१० - घ

पत्राणि ४६ (संपूर्णम्)

एकादशीतत्व ८६

ॐ नमो नारायणाय॥ प्रणम्य सच्चिदानंदं परमात्मानमीश्वरं। मुनीन्द्राणां मतं तत्त्वं वक्ति श्रीरघुनंदनः। अज्ञानतिमिरध्वंसि हरिपादनखत्विषं। प्रणम्यैकादशीतत्त्वं
तत्र वक्ष्यामि सन्मुदे। एकादशीव्रतं तत्र कलंजन्यायनिर्णयः। पुण्यकालेतु संक्रान्ते र्विधिवत्प्रतिषेधनं। व्रतस्य लक्षणं तत्र ग्रहसम्मार्जनन्तथा। वैदिके कर्म्मणि चैव नारायण
नतिस्मृती। विष्णुनामानि सांगार्थं नथाच्छिद्रावधारणं। ॐ तत्सदिति निर्देशः कर्म्मणां प्रागभवे घृतं। संकल्पविषये नित्यं काम्यं चैकादशीव्रतं। हविष्याद्धस्य विषय उपवा
ससमन्वयः। इत्यादिलक्षणान्यत्र व्रते गंधादिवर्जनं। व्रतेर्कत्वभिगामित्वं श्राद्धाहेन चतन्नवेत्। चतुर्थाह परित्यागः प्रशस्तस्तुतकोक्षिणः। एकादशीभोजने चु निंदानित्यत्व
साधकं। नित्यं सदादि विश्वजिद्यावज्जीवनयेत तथा। अशक्तौ मनसाकर्म्म नित्यात्पापक्षयादिकं। एकादशीव्रतफलं रात्रिसत्रनयस्तथा। न्यायैः संयोगपार्थक्यं हविष्याद्ध
स्य सर्वदा। एकस्य नित्यकाम्यत्वे योषिद्धाद्ध विवेचनं। उपवासाधिकारीच कृष्णायामधिकारिता। वैष्णवानां सपुत्राणां तथा वैष्णवलक्षणं। नित्योपवासे वव्यादिदोषाभावउ
पोषणं। सप्तवारेष्वथाधेयः पितृशेषउपोषणे। पूर्णातिथिस्वरूपं च पूर्णोपवासनिर्णयः। त्रिस्पृशैकादशी चैव दशम्यासंयुतासदा। नोपोष्यातासु संक्षेपो दशमीनियमस्तथा
एकादश्यां च संकल्पः श्रीशपूजाविवेचनं। षट्त्रिंशदुपवारादिजपपर्वविवेचने। द्वादशीनियमस्तद्वदुपवाससमर्पणं। पारणायां तथा कालः संकटे जलपारणं। तुलसी
महिमा तत्र तथा रुद्राक्षधारणं। स्वदत्तदेवनैवेद्याद्युपभोगक्रियास्तथा। श्राद्धपिण्डादनं तत्र कूपादित्यागयागता। त्यक्तुस्तचोपयुक्तश्च रजःस्नूतकिनाव्रतं। उपवासानुकल्प

१ एकादशी।

श्रुतेर्थैवोरुव्यवस्थितिः। एकभक्तं सदानक्तं हविष्यद्रव्यनिर्णयः। खिन्नधान्यस्य भक्षत्वं प्रतिषिद्धविवेचनं। चांद्रायणादौ ग्रासानां परिसंख्या व्यवस्थितिः। पारणानियमः पानोत्तपाननस
नादिकं। व्यवस्थाशयनादीनां संकथ्यन्ते जगत्पतेः॥ अथैकादशीव्रतं। तत्र वराहपुराणं॥ एकादश्यां निराहारो यो भुंक्ते द्वादशी दिने। शुक्ले वा यदि वा कृष्णे तद्व्रतं वैष्णवं महत्। महत्व
माह यदीच्छसि स्वनावाहं पुत्रसंपदमात्मनः। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। एतदिच्छन्सुधारां सि हन्ति पापानि पार्थिव। यो गृहीत्वा व्रतं मोहादेकादशीदिने नरः। नसमापयते तस्य
गतिः पापीयसी भवेत्। अथ एकादश्यां प्रकुर्वन्ति उपवासं मनीषिणः। इति भविष्यपुराणे उपवासपदश्रवणान्निराहारपदं। नैकादशीकालमात्राभोजनपरं। किंतु तद्युक्ताहोरात्राभोजन
परं। तत्रैव उपवासव्यवहारात् नचवैष्णवीत्वं उपवासपदस्याहाराभावमात्रपरत्वे लक्षणाप्रसंगात् निराहारपदस्योपवासपरत्वे तु न लक्षणा सामान्यशास्त्रस्य विशेषतात्पर्यकत्वात्।
तथाच कात्यायनः। नित्योपवासी यो मर्त्यः सायंप्रातर्भुजिक्रियां। संत्यजेन्मतिमान् विप्रः संप्राप्ते हरिवासरे। सायंप्रातरिति रात्रिदिवोपलक्षणं। मुनिभिर्दिवसं प्रोक्तं विप्राणां मर्त्यवासि
नां नित्यं। अहनि तथा तन्मस्विन्यां साष्टिप्रहरयामान्तः इति छंदोगपरिशिष्टेकवाक्यत्वात् अत एव खंडतिथेरप्यहोरात्रत्वकीर्त्तनमहोरात्रसाध्यकर्मांगत्वार्थं तथाच विष्णुधर्मो
त्तरे सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणं। सा तिथिस्तदहोरात्रं यस्यामस्तमितो रविः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणं।
शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः। अत एव गृह्यपरिशिष्टेन युग्माग्नीत्यभिधाय तिथ्योर्युग्मं महाफलमित्युक्तं अस्य प्रयोजनं तु तिथेः
खंडविशेषनियमं तत्तत्तिथ्या कर्मनिर्वाहे सहायभावेनान्यतिथ्यनुप्रवेशाद् उपवासाद्याचरणं च। एवंच प्रातःकाले तत्तिथ्यलाभे तिथ्यन्तरेऽपि उपवाससंकल्पः अहोरात्रभोजनरूपस्य प्रा

२

तरारंभार्हत्वात् संवत्सरप्रदीपे प्रातःसन्ध्यां ततः कृत्वा संकल्पं बुधः आचरेदित्युक्तं। अत्र च कर्मणस्तावदपूर्वजनकत्वेन च प्राधान्यं तिथ्यादेस्तु गुणत्वेन क्वचिदुपलक्षणत्वात्तथा च गर्गः
तिथिनक्षत्रवारादि साधनं पुण्यपापयोः। प्रधानगुणभावेन स्वातन्त्र्येण न ते क्षमाः। प्रधानस्य कर्मणो गुणभावेनांगत्वेन। एवं च निराहारपदस्योपवासपरत्वेन कलंजाधिकरणन्यायान्नैकाद
शीक्षणानाच मतिवाच्य भोजनं किन्त्वेकादश्यामिति विहितैकादशीमुक्ताहाराद्यधिकरणपरं॥ अथ कलंजाधिकरणं। तत्र श्रुतिः। न कलंजं भक्षयेदिति कलंजभक्षणाभावविषयकं कार्यमि
त्यर्थः। अत्र कालविशेषानुपदेशान्निषिध्यमानक्रियायां प्रवृत्तिमतो निषेधविधावधिकाराद्यावत्कालमेव तस्यां तस्य निवृत्तिः। नहि कलंजभक्षणात् धृतः कुतश्चित्कारणान्निवृत्तस्य निषेधानु
पालनं सकृद्धृत्तमिति कलंजभक्षणनिषेधो न पुनस्तन्निवर्त्तयति किन्तु भक्षणप्रवृत्तिमन्तमात्रमधिकारिविशेषणं यदा यदा भवति तदा तदा भवति एव निषेधविधिरपि तन्निवर्त्तयति नहि क
लंजस्य भक्षणमुपक्रम्य यावत् कालं तदभक्षयति ततश्च तदितरकालनिवृत्तिः सिद्धैवेति विफलो विधिः। ननु नासौ निवृत्तिः अप्रवृत्तस्य निवृत्त्यनुपपत्तेरिति चेत् सत्यं प्रवृत्त्युपाधिना वि
नाशं प्राप्स्यन् प्रागभाव एव प्रवृत्तिनिराकरणात् साध्यमानो निवृत्तिरुच्यते। न च प्रवृत्तिरपि साध्यतयोपदिश्यते किन्तु रागप्राप्तप्रवृत्तिमत एव निषेधविधावधिकारात्। यत्तु मनसा तु प्रवृ
त्तस्य भूतचेष्टावतोपि वा। यदनागतभावस्य वर्जनं तन्निवर्त्तनमिति। अत्रापिशब्देनाप्रवृत्तमात्रसमुच्चयान्न विरोधः। भूतचेष्टावत इति। भूतं क्ष्मादौ पिशाचादौ जंतौ क्लीवं त्रिषूचिते। प्राप्ते वृत्ते
समसत्ये देवयोन्यन्तरे तु ना इति मेदिन्युक्तेः भूतिप्राप्ते निषिद्धे चेष्टावत इत्यर्थः। ततश्च प्रागभाव एव कालान्तरसंबंधितया साध्यभावेनोपदिश्यते प्रागभावश्चानादिसंसर्गाभावमात्रपरः। स
चाप्रवृत्तस्यापि भक्षणकारणमननुतिष्ठतः सिद्धत्येव। तस्मात् सकृत् क्रियापर्यवसायित्वे विफलो विधिः कदाचिदकरणस्य निषेधमन्तरेणापि प्राप्तेः न च स्वर्गकामादिवत्साध्यतया प्रवृ

२ ए

निमित्तकत्वकालत्वमप्यन्नविषयमात्रानानुष्ठानाधीनसिद्धत्वान्निषेधनियोगानामितिकर्त्तव्यताकांक्षाविरहात् अतएवशुचित्वमपितत्रनांगं तस्मान्निषेध विधि युक्ताकवेन्तोदेवदत्तस्यगङ्गा
इत्यादिवत्तटस्थत्वेनाधिकारि विशेषणीभूतायाः प्रवृत्तेर्यावत्कालमनुवृत्तिस्तावत्कालमेवनिवृत्तेः साफल्यंनपुनर्निमित्तान्तरवत् सकृदनुष्ठानेनैव शास्त्रार्थसिद्धिः नैमित्तिकश्राद्धादौ अत्र
मावस्यावच्छिन्नजीवनस्याधिकारि विशेषणस्यैकत्वात् सकृत्करणेनैवशास्त्रस्यसफलत्वात् नैकामावास्यायामेवपुनःपुनःक्रियावैपेहं विधिगौरवापत्तेः नहितत्रासकृत्करणमेवशास्त्रंवि
नासिद्ध्यति अतएवस्मृतिः। यथाब्देनाब्दिकंकर्म्म मासेनैवचमासिकं। न्यूनाधिकंनकर्त्तव्यं नचैकत्रक्रियाद्वयं। एकस्याः क्रियायाएकदावारद्वयविधानंनयुक्तमितिहलायुधः। अमाव
स्याभेदेन पुनस्तदवच्छिन्नजीवनभेदादधिकारावृत्त्यशास्त्रार्थोपावर्त्तते एतन्न्यायमूलकमेव व्याख्यातवचनद्वयंजीमूतवाहनेनालिखितं। निमित्तंकालमादायवृत्तिर्विधिनिषेध
योः। तत्रपूज्ये विधेर्वृत्तिर्निषेधः कालमात्रके। तिथीनांपूज्यतानामकर्म्मानुष्ठानतोमतो। निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षते पूज्येयुग्मादिनेतिशेषः। रविसंक्रान्तौतुतदुपल
क्षितपुण्यकालएवग्राह्यः विधिवन्निषेधायकालान्तरकल्पनेगौरवाद्वचनाभावाच्च। संक्रान्त्युपवासस्यतु व्रतत्वेनभावत्वादभावघटितत्वाच्च उभयथापितत्रपूज्ये विधेर्वृत्तिरित्यनेन
पुण्यकालयुक्ताहोरात्रकर्त्तव्यता। संक्रान्तेः पुण्यकालस्तु यदाहोरात्रकेभवेत्। तदहोरात्रमात्रन्तु संक्रान्तिरभिधीयतइति आगमसारनिर्णये कृष्णानन्दधृतवचनात्। एवमेवगुम्ब
णाः। प्रस्तुतएकस्मिनकाले विधेयप्रतिषेध्ययोः पुण्यपापयोः प्रतिपादकंकामधेनु नैयतकालिक कल्पतरु कृत्यचिन्तामणि हेमाद्रिकाचस्पतिधृतं देवीपुराणवचनं। अतीतानाग
तोभोगोनृणांपंचदशस्मृताः। सान्निध्यन्तु भवेत्तत्र ग्रहाणां संक्रमे रवेः। व्यवहारोभवेल्लोके चन्द्रसूर्योपलक्षितः। कालेविफलतोसर्वंब्रह्मांडं सचराचरं। पुण्यपापविभागेन फलदेवीप्रयच्छ

३

ति। एकधापि हुतं तस्मिन् कोटिकोटिगुणं भवेत्। धर्म्माद्भिवर्द्धते स्यायुराज्यं पुत्रसुखोदयः। अयनन्धाद्याधिशाकादि विषुवायनसन्निधौ। विषुवेषु च यद्दत्तं जप्तं भवति चाक्षयं। एवं विष्णु
पदे चैव षडशीतिमुखे षु च। भोगो व्याप्ति सूक्ष्मसंक्रमणकाल सन्निधाने पुण्यतमत्वमिति यावदिति कल्पतरुः। वस्तुतस्तु भुज्यत इति भोगो भोग्यः संक्रमणे वेरतीतानागतः कालो भोगस्तन्नि-
मित्तक पुण्यपापजननयोग्य इति यावत् अत एव पुण्यपाप विभागेनेत्युपसंहृतं। यत्तु अर्द्धरात्रव्यतीते तु संक्रान्तिर्यदि दृश्यते। पूर्वव्रतादिकं कुर्य्यात् परे ह्युः स्नानदानयोः। तदुपोस्यैव च
संक्रान्त्यां स्नात्वा योऽभ्यर्चयेद्धरिं। प्रातः पंचोपहारेण सकामफलमाप्नुयात्। इति भीमपराक्रमवचनैकवाक्यत्वात्। परदिवसीयस्नानदाननिमित्तकं प्राग्दिनोपवाससंयमरूपव्र
तादिपरं अन्यथा प्रागुक्तविरोधापत्तेः सच कालः क्रियानित्याह नाड्यः पंचदशेति अयतः पंचदशदंडानां पुण्यत्वं दिवाविष्णुपदीविषयमिति तिथितत्त्वे वक्ष्यते सान्निध्यमित्यादिना
तस्यैव कालस्य स्तुतिः विकल्पते स्वभावात् प्रच्यवते देवीसंक्रांतिकालस्वरूपा दुर्गा संक्रान्त्युपक्रमे देवीपुराणस्व। समायनं ऋतुर्मास पक्षो ऽहश्चक्रमेणतु। स्थूलसूक्ष्मविभागेन देवी
सर्वगता विभो इत्यभिधानात् कलाकाष्ठादिरूपेण परिणामप्रदायिनीति मार्कण्डेयपुराणाच्च तस्मादमावास्यायां हरितभपिनद्धिं घादित्यादे र्निषेधवधित्वेन कलंजन्यायाद्यावत्। काल
भावित्वं निराहारस्य तु बेधोपरामरूपत्वा द्व्रतरूपत्वाच्च न तदवसरः तयो र्भावघटितत्वात्॥ ०॥ अथ व्रतलक्षणं॥ ०॥ दीर्घकालानुपालनीयः संकल्पो व्रतमिति नारायणोपाध्यायानां
स्वरसः स्वकर्त्तव्यविषयो नियतसंकल्पो व्रतमिति श्रीदत्त हरिनाथवर्द्धमान प्रभृतयः संकल्पश्च भावेन याच कर्त्तव्यमेव निषेधे तु न कर्त्तव्यमेवेति ज्ञानविशेषः। अत एव संकल्पः
कर्म्म मानसमित्यभिधानिकाः वस्तुतस्तु पूर्वोक्त वराहपुराणवचनेन एकादश्युपवास एव व्रतं तत्रैव तद्व्रतमित्यभिधानात्। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन

२ ए

पादकृच्छ्रउदाहृत इत्याद्युक्तेषु च स्यकभक्तनक्तायाचितभोजनोपवासादिषु पादकृच्छ्राद्यभिधानाच्च न संकल्पो व्रती किन्तु संकल्पविषयस्तत्तत्कर्म्मैव इति अतस्तन्नतुना व्रतानां संकल्प
संभवत्वमुक्तं तथा हि संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः। व्रता नियमधर्म्माश्च सर्वे संकल्पजाः स्मृताः। अनेन कर्म्मणा इदमिष्टं फलं साध्यते। इत्येवं विषया बुद्धिः संकल्पस्तदनन्तर
मिष्टसाधनतयावगम्यते तस्मिन्निच्छा जायते तदर्थं प्रयत्नं राघवभट्टधृतोक्तविष्णुः। व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे। आरब्धे सूतकं न स्यादनारब्धे तु सूतकं। कुरुते इत्येवं यज्ञाः
संकल्पसंभवाः। व्रता नियमधर्म्माश्च चतुर्थाध्ये वक्ष्यमाणाः सर्वे इत्यनेनान्येपि शास्त्रार्थाः संकल्पादेव जायन्ते इति कुल्लूकभट्टः। तथा व्रते संकल्प उक्तः। प्रातः संकल्पयेद्विद्वानुपवासव्र
तादिषु। नापराह्णे न मध्याह्ने पित्र्यकालौ हि तौ स्मृतौ॥ इति कालविवेकधृतवराहपुराणवचनेन तथा संकल्पो व्रतस्यारंभ इत्यभिहितं। राघवभट्टधृतो विष्णुः। व्रतयज्ञविवाहेषु श्राद्धे
होमेऽर्चने जपे। आरब्धे सूतकं न स्यादनारब्धे तु सूतकं। आरंभो वरणं यज्ञे संकल्पो व्रतजापयोः। नांदीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया। निमंत्रणं तु वा श्राद्धे आरंभः स्यादिति
श्रुतिरिति। स्मृत्यर्थसारधृतविष्णुपुराणेन च। अत्र व्रतपारणयोरिति राघवभट्टेन लिखितं युक्तं चैतद्व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने आरब्धे सूतकं न स्यादनारब्धे तु सूतकमिति
वचनात् प्राक्परिक्रियेति साग्नेर्दर्शश्राद्धविषयं। तत्रैव तस्याग्न्युद्धरणविधानेन तदाग्निकपाकस्यासाधारणांगत्वात् संकल्पविधानं तु संवत्सरप्रदीपे। प्रातः सन्ध्यां ततः कृत्वा संक
ल्पं बुध आचरेत्। शान्तिपर्वणि। गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः। देवतास्तस्य तुष्यन्ति कामिकं तस्य सिध्यति। अन्यथा तु वृथा मर्त्याः क्लि
श्यन्ति स्वल्पबुद्धयः। यद्वेति पक्षान्तरं। तेन ताम्रपात्राभावे संकल्पमात्रं कर्त्तव्यं कल्पतरौ तु यद्वेति नक्तादिपरं तदयुक्तं तत्पदाध्याहारापत्तेः। यत्संकल्पयेत् न गृह्णीयादित्यनेनैवोपपत्तौ वाकार

उपवासपदवैयर्थ्याच्च। तथा च कालमाधवीये वराहपुराणे। गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयाद्यद्वा वार्य्येव धारयेत्। यद्यपि व्रतं शास्त्रविहितो नियमः नियमश्च का
मचारस्य विशेषावरोधः। यथा अश्राद्धभोजी स्वार्थत्वात् प्रवृत्तौ नियमः सति। भोजने अश्राद्धमेव भुंक्ते इति तावन्मात्रमिह न रस्यते। एवं ऋतुकालाभिगामी स्यादित्यत्र ऋतुकालेऽ
भिगमनं व्रतं। यस्य स ऋतुकालाभिगामी व्रतेन इति कल्पतरुः। अत एव संकल्पांगकमेव विचार्यत इति शेषः। अत एव गृहीतव्रताकरणे दोषमाह छागलेयः। पूर्वं व्रतं गृहीत्वा यो ना
चरेत् काममोहितः। जीवन् भवति चांडालो मृतः श्वा चैव जायते। द्वादशीव्रतमादाय व्रतभंगं करोति यः। द्वादशाब्दं व्रतं चीर्णं निष्फलं तस्य जायते। प्रायश्चित्तमाह स एव पुराणे। लोभान्मो
हात् प्रमादाद्वा व्रतभंगो यदा भवेत्। उपवासत्रयं कुर्य्यात् कुर्य्याद्वा केशमुंडनं। प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्। वाशब्दः समुच्चये तेन मुंडनं च कर्त्तव्यमिति। प्रायश्चित्तविवेकः
प्रमादादस्य सत्त्वे प्रतिप्रसूयते देवलः। सर्वभूतभयं व्याधिः प्रमादो गुरुशासनं। अव्रतघ्नानि कथ्यन्ते सकृदेतानि शास्त्रतः। सर्वभूतभयं राजव्याघ्रादिभयं प्रमादो विस्मृतिः इति
कर्त्तव्यतायां स एव अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः। सूर्य्याग्निदेवताभ्यश्च निवेद्य व्रतमाचरेत्। ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्जनं। व्रतेष्वेतानि चत्वारि वरिष्ठानीति
निश्चयः। प्रातर्व्रतमाचरेदित्यन्वयः प्रधानपदार्थान्वयस्याभ्यर्हितत्वात् प्रातः संकल्पयेदिति वचनैकवाक्यत्वाच्च अभुक्त्वा प्रातराहारमित्यर्थात् पूर्वदिने एकभक्तत्वमापातितं त्वा
हारस्य रागप्राप्तत्वादनुपादेयतया उद्देश्यस्य एकत्वसंख्यावत् ग्रहसम्मार्जनन्यायेनाविवक्षितत्वं युक्तं न च न्यायस्तृतीयाध्याये निरूपितः। यथा ज्योतिष्टोमे इति कर्त्तव्यताकांक्षायामाह
दशग्रहान् गृह्णाति इति ग्रहः ससोमकपात्रं तदनंतरं कुशपवित्रेण ग्रहं संमार्ष्टीति श्रूयते तत्र संशयः। किमेकस्य ग्रहस्य मार्जनं ततः ग्रहेषु होतीति वा केन प्रमाणेन दशग्रहाणां तदर्थं किंतु

देश्यगतासंख्यानविवक्षितानवेति। यथापशुनायजेतेत्यत्रैकवचनश्रुतिबलादुपादेयपशुगतासंख्याविवक्षितातथैवग्रहमित्येकवचनश्रुतिबलादुद्देश्यगतापिसंख्याविवक्षिताभवितुमर्हतीति त
स्मादेकस्यैवग्रहस्यमार्जनेप्राप्ते सिद्धान्तयतिपशोर्वैवाक्यान्तरेण। प्राप्तत्वात् अनेनैकवचनेनयागसंबंधावगमाद्यागंप्रतिपशोर्गुणभावावगमाद्गुणोहि प्रधानस्यावृत्त्यभावात् किंचबहुभिःपशु
भिःकिमुतपशुनाइत्यवच्छेदकत्वाकांक्षायांतदवच्छेदकत्वेनएकत्वसंख्यासम्बध्यत इत्युपादेयगतायाःसंख्यायाविवक्षितत्वंयुक्तं ग्रहंसांतुवाक्यान्तरेणयागसंबन्धावगमात्सम्मार्ज
नवाक्येद्वितीयाश्रुत्यासम्मार्जनंप्रतिग्रहस्यप्राधान्यावगमात् यावत्प्रधानंगुणास्यसम्मार्जनस्यावर्तनीयत्वात्कियन्तोग्रहाःसंमार्जनीयाइत्याकांक्षायामनुपादेयग्रहगतासंख्यानवि
वक्षिताइतिमाधवाचार्य्याः। उत्तरमीमांसाकल्पतरुस्तुकिंचिद्विधातुंसिद्धवन्निर्देश्यत्वमुद्देश्यत्वंग्रनुष्ठेयत्वेननिर्देश्यत्वमुपादेयत्वंउद्देश्याविवक्षायांग्रहंसंमार्ष्टीत्यत्रोद्देश्यग्रहस्याविव
क्षास्यात् तथाचचमसादेरपिसम्मार्गप्रसंगःसचायुक्तः चमसाधिकरणोहिप्रकृतयागसंबन्धिसोमपात्रत्वाविशेषेण ग्रहपदस्यचोपलक्षणार्थत्वेनचमसानामपिसंसर्गीमाशंक्य
सिद्धान्तितं। अनुवाद्यमनतिक्रान्तुनविधेयमुदीरयेत्। नह्यलब्धास्पदंकिंचित्कुत्रचित्प्रतितिष्ठतीतिन्यायेनकेवलसम्मार्गविध्ययोगादुद्देश्येनभाव्यंतत्रग्रहशब्देनसमर्पितं नच
चमसोपलक्षणार्थोग्रहशब्दः। ग्रहयागावान्तरापूर्वसाधनस्यान्तरंगस्यतेनलक्ष्यमाणत्वादन्यथातदसाधनस्यापि ग्रहस्यसम्मार्गःप्रसज्येतव्रीहियवयोस्तत्त्वांतरापूर्वभेदाभावात्व्रीहि
तप्रोक्षतीत्यत्रव्रीहिशब्दोयवोपलक्षणार्थइतियुक्तं। ततश्चग्रहेष्वेवसम्मार्गइति। ननुयदिग्रहउद्देश्यत्वेनपरिग्रहीतस्तर्हितदेकत्वमपिपश्वेकत्ववद्विवक्षितंस्यात् नैवंग्रहगत
त्वेकत्वंग्रहानप्रत्यवच्छेदकत्वेनरूपेणाविवक्षितंयुक्तांहिपशुनायजेतेत्यत्रउपादेयविशेषणत्वादेकत्वविवक्षा। एकप्रसरतयैकपशुविशिष्टयागविधिसंभवादत्रतुग्रहत्वैकत्वोद्द

5

ह्रोनसन्मार्गविधाह्यद्दिश्यमानयोर्दुर्गानां च परार्थत्वाद्‌सं बन्धः सह त्वात्स्यादितिन्यायेनपरस्परासंबंधादग्रहस्योद्देश्येन पर्य्यवसानाच्च प्रस्तुद्देश्यं वाक्यसमाप्तिः स्यादग्रहं संमार्ष्टितं चैक मिति ततश्च वाक्यभेदः स्याद्‌तोग्रहत्वेन सर्वान प्रकृतान नुद्य सन्मार्गमात्रं विधेयमिति। एवं यस्योभयं हविरार्त्तिमृच्छेत्‌सऐन्द्रं पंचशरावं चरुं निर्वपे दित्यत्रोभयत्व मविवक्षितं। यदुक्तं प्र कृत्यर्थेपि रवरद्रेत दुद्देश्यस्य विशेषणं संख्या या तुल्यनीतित्वा दविवक्षां प्रपद्यते एवं स्वर्गकामइत्यादावपि पुंस्त्वमविवक्षितं अतएवोक्तं। प्राप्तेकर्म्मणिनानेको विधातुंशक्यते गुणः। अप्राप्ते तु विधीयन्ते बहवोप्येकयत्नतइति। किंचसर्वेषामेवसंस्कारस्याकांक्षितत्वेनएकत्वाविवक्षायुक्तातस्मात्‌सर्वेग्रहाःसंमार्जनीयाइति। एवमत्युक्ताप्रातराह्वावनित्यत्वाप्येकत्वा विवक्षात्तु सत्यमविशेषिताहार निवृत्ति परत्वासंभवादिशेषापेक्षायामेकवचनं नियामकं अन्यथान ध्यवसायापत्तेः। आह्रियतइत्याहार मन्नादिततश्च पूर्वाह्णे एकाहारं कृत्वा पराह्णे प्रातःकालेकृतस्नानाचमनं। ॐ सूर्य्यः सोमोयमः कालः सन्ध्येभूतान्यहःक्षपा। पवनोदिक्पतिर्भूमिराकाशंखचरामराः। ब्राह्मंशासनमास्थाय कल्पध्वमिहसन्निधिं इति। अनेनसूर्य्या दीन्निवेद्यव्रतं संकल्पयेत्‌। कूर्मपुराणे। बहिर्ग्रामान्त्यजान्सूतिं पतितां च रजस्वलां। नस्पृशेन्नाभिभाषेत नेक्षेतव्रतवासरे। बौधायनउद्योगपर्वेच। अष्टौतान्यव्रतघ्नानि आपोमूलंफलं पयः। हविर्ब्राह्मणकाम्याच गुरोर्वचनमौषधं। अतएवफलाहारादावपिमूलजलाद्यविरुद्धं आरब्धव्रतस्यासमाप्तौ मरणेपि तत्फलमाहांगिराः। योयदर्थं चरेद्धर्म्मंनसमाप्यमृतोय दि। सततुएपफलंप्रेत्य प्रप्नुयान्मनुरब्रवीत्‌। प्रेत्यपरलोकेप्रायश्चित्तविवेकोप्येवं। वैदिकमात्रे नारायणस्मरणनमस्कारौ। योगियाज्ञवल्क्यः। ध्यायेन्नारायणंनित्यंस्नानादिषु चकर्म्मसु प्रायश्चित्तेपिसर्वस्माद्दुष्कृतान्मुच्यतेपुमान। प्रमादात्कुर्वतांकर्म्म प्रच्यवेताध्वरेषुयत्‌। स्मरणादेवतद्विष्णोः संपूर्णंस्यादितिश्रुतिः। तद्विष्णोरितिमंत्रेणमज्जेदप्सुपुनःपुनः। गायत्रीवैष्णवीत्येष

५ ए

विष्णोः संस्मरणाय वै। मंत्रश्च। ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततं। वामनपुराणे। सर्वमंगलमंगल्यं वरेण्यं वरदं शुभं। नारायणं नमस्कृत्य सर्वकर्म्माणि कारयेत।
शातातपपराशरौ। अच्छिद्रमपि मद्वाक्यं वदन्तीक्षितिदेवताः। प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः समं। क्षितिदेवता विप्राः अग्निष्टोमफलैरिति स्तुतिः। विष्णुः ब्राह्मणानां प्रसादेन दि
विति ष्ठन्ति देवताः। ब्राह्मणाभिहितं वाक्यं न मिथ्या जायते क्वचित्। यद्ब्राह्मणास्तुष्टतमा वदन्ति तद्देवताः प्रत्यभिनंदयन्ति। तुष्टेषु तुष्टाः सततं भवन्ति प्रत्यक्षदेवेषु परोक्षदेवाः। तदपि ब्राह्म
णाय दक्षिणारूपं किंचिद्दत्वा ग्राह्यं। तथा च गोविन्दमानसोल्लासे नारदीयं। सर्वेषामप्यलाभे तु यथोक्तकरणं विना। विप्रवाक्यं तथा शम्भु ब्रतस्याद्यापलक्षणं। इत्या विप्रवचो यस्तु गृह्णाति
मनुजः शुभे। अप्रदत्वा दक्षिणां वापि स याति नरकं ध्रुवं। उद्यापनं प्रतिष्ठा ब्राह्मणालक्षणमाह पैठीनसिः। क्षमा दया दमो दानं धर्मः सत्यं श्रुतं घृणा। विद्या विज्ञानमास्तिक्यं मेतद्ब्राह्मणलक्षणं।
श्रुतमर्थाववोधः। अतएव मनुः। चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः। दशलक्षणको धर्म्मः सेवितव्यः प्रयत्नतः। धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधः द
शकं धर्म्मलक्षणं। धृतिः स्थिरयोगानिष्ट प्राप्तौ चित्तस्य यथापूर्वमवस्थानं इन्द्रियनिग्रहः अप्रतिषिद्धेऽपि विषयेऽनतिप्रसंगः। धीर्हिताहितविवेकः शास्त्रार्थज्ञानं विद्या आत्मतत्वज्ञानं स
त्ये विशेषमाह विष्णुपुराणं। सत्यं यत्परदुःखाय तत्र मौनपरो भवेत्। प्रियमुक्तं हितं नैतदिति मत्वा न तद्वदेत्। गोतमः। नानृतवचने दोषो जीवनं चेत्तदधीनं न तु पापीयसो जीवनम्प्रति
काशीखंडे। सर्वैलवणानि सादिक्षये चापि पतिव्रता। पतिनास्तीति न ब्रूयादायाद्यर्थं न योजयेत। क्षये च घृतं वर्हितमिति। शपथेपि मनुः। कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने। ब्राह्म
णाभ्युपपत्तौ च शपथे नास्ति पातकं। इन्धने होमार्थमपहृते ब्राह्मणाभ्युपपत्तौ ब्राह्मणरक्षार्थमंगीकृतधनादौ मिथ्या शपथे पापं नास्तीति कुल्लूकभट्टः॥ यमः। ननर्मयुक्तं वचनं हिनस्ति न

6

स्वैरवाक्यं न च मैथुनार्थं। प्राणात्यये सर्वधनापहारे पंचानृतान्याहुरपातकानि। नर्मक्रीडापरिहास इति यावत् अत एव मिताक्षरायां स्मृतिः। गुरुणापि समं हास्यं कर्त्तव्यं कुटिलं विना। स्वैर
वाक्यं स्वानर्थपरिहारार्थं कपटेन विना ह्यन्योन्यमिथ्याभिलापः। अत एव शंखः। यस्य यस्य तु वर्णस्य वृत्तिच्छेदं समाचरेत्। तस्य तस्य वधप्रोक्तं प्रायश्चित्तं समाचरेत्॥ वायुपुराणे। यदेतद्द्रवि
णं नाम प्राणास्ते वै बहिश्चराः। स तस्य हरते प्राणान् यो यस्य हरते धनं। आदित्यपुराणमपि। षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः। आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्। महाभारते।
सत्यं भूतहितं प्रोक्तं मनसो दमनं दमः। तपः स्वधर्मवर्तित्वं शौचं संकरवर्जनं। सन्तोषो विषयत्यागो ह्रीरकार्यनिवर्तनं। क्षमा द्वन्द्वसहिष्णुत्वमार्जवं समचित्तता। ज्ञानं तत्वार्थसंबो
धः समश्चित्तप्रसन्नता। दया भूतहितैषित्वं ध्यानं निर्विषयं मनः। द्वन्द्वशीतोष्णादि। वैदिककर्मणि प्रथमतः ॐ तत्सदिति निर्देशोपि तथा च भगवद्गीतायां। ॐ तत्सदिति निर्देशो ब्रह्म
णस्त्रिविधः स्मृतः। ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा। ॐ तत्सदिति निर्देशो ब्रह्मणो जगदीशस्याभिधानं ब्रह्मविद्भिश्चिन्तितं तत्र तावदोमिति ब्रह्म इत्यादिश्रुतिप्रसिद्धे रोमि
ति ब्रह्मणो नाम इति पातंजलिरप्याह तस्य वाचकः प्रणव इति अस्यैव ब्रह्मणः। ओंकारो भगवान्विष्णुरित्यादि तद्वाच्यवाचकयोरभेदेन तथा जगत्कारणत्वेन प्रसिद्धत्वादविद्वत्परो
क्षत्वात्तच्छब्दोपि ब्रह्मणो नाम एवं परमार्थसत्त्वसाधुत्वप्रशस्तत्वादिभिः सच्छब्दोपि अतस्तेन त्रिविधेन निर्देशः कार्यः। यत्र यस्यायं त्रिविधो निर्देशस्तेन परमात्मना ब्राह्मणादयो
निर्मिताः। तथा च तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां। यस्मादेवं ब्रह्मणो निर्देशस्तस्मादोमित्युदाहृत्य उच्चार्य कृता वेदवादिनां यज्ञाद्याः
शास्त्रोक्ताः क्रियाः सततमंगवैकल्येपि प्रकर्षेण वर्त्तन्ते सगुणा भवन्तीति शंकराचार्यचरणाः। व्यक्तमाह योगियाज्ञवल्क्यः। यन्न्यूनं चातिरिक्तं च यच्छिद्रं यदयज्ञियं। यदमेध्यमशुद्धं च यातयामं च

६

यज्ञेवेत्। तदोंकारप्रयुक्तेन सर्वं चाविकलं भवेत्। भगवद्गीतायां। तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः। दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः। तदिति ब्रह्मणोऽभिधानमुदाहृत्येत्यनुषं
गः अनभिसन्धाय कर्म्मणः फलमित्यर्थः। तस्मात्फलाभिसन्धानं विना मुमुक्षुणा कर्म्म कर्त्तव्यमित्यपि बोद्धव्यं। तथा सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते। प्रशस्ते कर्म्मणि तथा सच्छब्दः पा
र्थ युज्यते। यतो विद्यमानस्य जन्मनि उत्कृष्टे चरितेऽपि सदिति प्रयुज्यते अतो यज्ञादौ कर्म्मणि प्रथमतः सच्छब्दः प्रयुज्यत इति। तस्मादोंतत्सदित्येवमुच्चार्य्य वैदिकं कर्म्म कर्त्तव्यमिति तेनैतादृशे
ति कर्त्तव्यताकः संकल्पविषयो व्रतमिति तत्त्वं। अत एव संकल्पविषयस्य व्रतत्वं वाचस्पतिमिश्रोऽप्याह यथोक्तकर्त्तव्यतया संकल्पितं व्रतमिति अमरसिंहोऽप्युपवासादौ व्रतशब्दस्य संकेतमाह
नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकं। तच्च व्रतमुपवासादिलक्षणं पुण्यकं पुण्यजनकमित्यर्थः अत एव नियमशब्दः कर्म्मणि व्युत्पन्नः। यत्तु व्रतपदं नियतसंकल्पविशेषवाचकमिति प्रा
यश्चित्तविवेके कल्पतरुणाभिहितं तदपि नियतसंकल्पविशेषो यत्र द्वादशवार्षिकव्रतादौ तस्य वाचकमित्येतत्परं। अन्यथा व्रतपदं मरणेऽपि मनुना प्रयुक्तं यैर्यैर्व्रतैरपोहेत्युक्त्वा म
रणस्यापि तेनोक्तत्वादिति। किन्तु व्रतपदं द्वादशवार्षिकपरमेवेत्याभ्यां स्ववाक्याभ्यां विरुद्धं स्यात्। नच नागृहीतविशेषणा बुद्धिर्विशेष्ये चोपजायत इति न्यायेन संकल्पवाचित्वमि
ति वाच्यं। श्रीदत्तादीनां मतेऽपि स्वकर्त्तव्यविषयो नियमसंकल्पो व्रतमिति लक्षणेऽपि स्वकर्त्तव्यविषयस्य तथात्वात् विनिगमकन्तु प्रागुक्तावरहणाशायाश्च स्वापादिवचनमेव।
वस्तुतस्तु वाचनिकेऽर्थे न्यायनियतत्वोत्यथा नियतं हि वाचकमिति अत एव न केनापि मुनिना संकल्पे व्रतपदं प्रयुक्तं किन्तूपवासादावेव अत्र च संकल्पविषयस्यानेतरं पूजयेद्धरिमि
त्यादौ भावत्वं नैक्षेताद्यन्तमादित्यमित्यादौ चाभावत्वं। तर्हि व्रतस्य क्वचिदभावरूपत्वान्निषेधः कालमात्रकर्त्तव्यस्यापि विषयत्वमिति चन्न तस्य केवलनिषेधविषयकत्वात्। अस्य च

संकल्पादीति कर्त्तव्यतायागित्वेन भावघटितत्वात् तत्र पूज्यविधेर्द्दृत्तिरित्यस्येव विषयत्वमितिजीमूतवाहनेनापि एकादश्यां भोजनेदोषं दर्शयन्नुपवासं निपद्यतिनचायं निषेधइ
तिकर्त्तव्यताविधानात् निषेधे चेतिकर्त्तव्यताविरहाच्छ्रुतपदाप्रयागाच्चेत्युक्तं यत्तु निषेधप्रकरणस्य देवलवचनेन नशंखेन पिबेत्तोयं नरवादेत्कूर्म्मशल्लकैः । एकादश्यां नभुंजीत पक्ष
योरुभयोरपि इत्यत्र नञो निषेधे मुख्यत्वाद्भोजनाभावः प्रतीयते नत्वभोजनसंकल्परूपं व्रतं लक्षणाप्रसंगात् । एकेनैव मत्स्यपुराणे कृता दशम्यां नियताहारो मांसमैथुनवर्जितः । ए
कादश्यां नभुंजीत पक्षयोरुभयोरपि इति दशमीनियमपूर्वकं व्रतमभिधाय । रटन्तीह पुराणानि भूयो भूयो वराननेः । नभोक्तव्यं नभोक्तव्यं संप्राप्ते हरिवासरे इत्यादिविधेरनन्यगतिक
तया निषेधस्यावश्यकत्वं वाच्यं । तथा च निषिद्धे भोजने दोषश्रवणं निषेधातिक्रमजन्यतयैव उपपद्यमानं नफलश्रुत्या काम्यतया निरूढस्य व्रतस्य नित्यत्वे प्रमाणमिति तच्चिन्त्यं न
खलु नशंखेन पिबेत्तोयमित्यादिभिः संप्रतिपन्ननिषेधभावैः साहचर्य्येणैकादशीभोजननिषेधकत्वं राद्धं । किंतु एकादश्यां नभुंजीत पक्षयोरुभयोरपि । वनस्थयतिधर्म्मोयं शु
क्लामेव सदा गृहीति गोभिलवचने धर्म्मशब्दसमभिव्याहारेनैकादश्यामुपवसेदित्यनेनैकवाक्यतयाऽ चोपवासविधायकं नहि निषिद्धानां ब्रह्महत्यादीनां त्यागे कश्चिद्धर्म्मो जायते ।
किन्तु भावरूपांगानुगृहीतो निषिद्धो धर्म्मो भवेदिति नतत्श्चवे धोपवासे उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह । उपवासः सविज्ञेयः सर्वभोगविवर्जितः । इति पुराणवचनेन भोगमा
त्रस्येव वर्जने प्राप्ते वचनान्तरादहोरात्राभोजनरूपस्येव पापनिवृत्तिगुणायुक्तस्यैव प्राधान्यं अन्यभोगवर्जनस्यांगत्वं । तथा च सूतके मृतके चैव प्रणम्य मनसा हरिं । एकादश्यां न
भुंजीत व्रतमेतन्न लुप्यते । आग्नेये । एकादश्यां नभुंजीत व्रतमेतद्धि वैष्णवं । अत्रैकादश्यामुपवासमात्रस्य व्रतत्वमुक्तं एकस्यैव नित्यत्वं काम्यत्वं च अत एव स्मृतिः । जह्याज्ञ कथयं

७९

नित्यं काम्यं भक्तं चतुष्टयं। एतच्च भक्तं नित्यद्वयवर्जनं प्रशक्तावावश्यकं नित्ये किंचिदंगहानावपि फलसिद्धिरितिन्यायात् काम्ये तु शक्त्यधिकरणन्यायात् सांगस्यैव संपूर्णफलत्वेन भक्त

चतुष्टयवर्जनमभिहितं। एकादश्यां न भुंजीत इत्यस्य व्रतपरत्वेपि नाभोजनसंकल्परूपतातस्याः पूर्वं दूषितत्वात् ततश्च यथा एकादश्यां न भुंजीत इत्यच वचनांतराद् उपवासरूप

व्रतपरत्वं तथा न भोक्तव्यमित्यत्रापि। वस्तुतस्तु वाराहपुराणे एकादशीव्रतसंदर्भमध्ये नशांखेनपिवेत्तोयमितितिनभोक्तव्यं न भोक्तव्यमिति वचनद्वयमभिधाय व्रताकरणे प्रत्यवायउ

क्तः। न च पौनरुक्त्यमियातस्य निषेधकत्वमिति वाच्यं। तथात्वे एतद्वचनमेव न भोक्तव्यमिति पुनरुपादानं व्यर्थं स्यात्। किंतु वीप्सायातस्यैव व्रतस्य नित्यत्वख्यापनमिति अन्यथा निषेधः

कालमात्रं कइत्यनेन एकादशीक्षणास्व भोजननिषेधः स्यात् न वादेत कूर्म्मशूकराविति अविशेषो वोध्यः। चक्रांकितस्तु यः कूर्म्मो वोदितः कनकप्रभः। वाराहः श्वेतवर्णीस्तु त्रयमे

तत्र भक्षयेत्। इति समुद्रकरध्वतात् वा त्या वस्था यो चक्रांकितत्वेन तदानीं कूर्म्मस्याभक्षत्वं अभ्रनन्तीत्यनुदृष्टत्तो हारीतः। महारण्यवासिनश्च वराहांस्तथेति। एवं च विवदन्ति श्वग्र

ग्रामशूकराश्चेति वशिष्ठोक्तेः श्वेताश्वेततया व्यवस्थितः। कल्पतरुस्तु श्राद्धे नियुक्ता नियुक्ता तयेति विहनूपासकस्पत सर्वथा निषिद्धं यथा वाराहे भगवद्वाक्यं। भुक्त्वा वराहमांस

न्तु यस्तु मां मुपसर्पति। वराहे दश वर्षाणि भूत्वा वै चरते वने। यदपि हरिवासरपदाद् होराचाभोजनप्रतीते त्रिविधः। कालमात्रक इत्यनेनैकादशीक्षणमतिवाह्य भोजनमिति तद

पि न किंचित् यतो हरिवासरपदाद्धरितिथिर्वैकादश्येव प्रतीयते तथा च स्कन्दपुराणे प्रतिपत्प्रभृतयः प्रोक्ता उदयादोदयाद्रवेः। संपूर्णा इति विख्याता हरिवासरवर्जिताः। भवि

ष्योत्तरं। हिताय सर्वलोकानां तिथिमेकादशीं स्वयं। निर्ममे स्वशरीरात्तु सेयं वै वैष्णवी तिथिः। अथवा हरिवासरो द्वादश्याः प्रथमः पादः तत्र पारणं न कुर्यात्। तथा च विष्णुधर्मोत्तरे॥

द्वादश्यां प्रथमः पादो हरिवासरसंज्ञकः। तमतिक्रम्य कुर्वीत पारणां विष्णुतत्परः॥ अथैकादशीव्रतं नित्यं काम्यं च गोविन्दमानसोल्लासकृत्यमहार्णवयोर्भविष्योत्तरे। एकादशीव्रतं
देव नित्यं वा काम्यमेव वा। कथं वा क्रियते तत्तु नियमे वात्र कीदृशः इत्यादि युधिष्ठिरप्रश्नमभिधाय। अहं ते कथयिष्यामि श्रेष्ठ राजन् पांडुकुलोद्भव। नित्यमेतद्व्रतं नाम कर्तव्यं सार्ववर्णिकं
वां छुभिः सर्वदा सद्भिः पुरुषार्थचतुष्टयं। न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे। इति श्रीकृष्णप्रतिवचनमभिहितं। अत्र नित्यमिति श्रवणान्नित्यत्वं पुरुषार्थचतुष्टयमिति श्रवणा
त् काम्यत्वं कालमाधवीये व्रतमेवैवतः। इति विज्ञाय कुर्वीत अवश्यमेकादशीव्रतं। विशेषनियमाशक्तोऽहोरात्रं भुक्तिवर्जितं। निगृहीतेन्द्रियः शुद्धः सभार्यो विष्णुतत्परः। उपोष्यैकाद
शीं पापान्मुच्यते नात्र संशयः। शक्तौ तु कात्यायनः॥ शक्तिमांस्तु नरः कुर्यान्नियमं सविशेषणं। कृत्यकल्पलतायां भविष्यपुराणं॥ युधिष्ठिर उवाच। एकादशीव्रतं देव नित्यं वा काम्य
मेव वा। तन्मे कथय गोविन्द श्रोतुं कौतूहलं मम॥ श्रीभगवानुवाच॥ नित्यमेतद्व्रतं नाम कर्तव्यं सार्ववर्णिकं। सर्वाश्रमाणां सामान्यं सर्वधर्मेष्वनुत्तमं। एकादश्यां न भुंजीत पक्षयोरु
भयोरपि। एवं च एकादशीव्रतस्य नित्यत्वेपि शक्तेन तदंगतया संयमपारणादि नियमोऽवश्यमनुष्ठेयः॥ अथ वृद्धिश्राद्धविषयः। ननु व्रतस्य वैदिकत्वेन। नानिष्ट्वा तु पितॄन् श्राद्धैः क
र्म वैदिकमारभेत्। इति शातातपवचनादारंभे कथं न वृद्धिश्राद्धं उच्यते नेदं श्राद्धविधायकं गौरवात् किन्तु यत्र कर्मणि वचनान्तरप्राप्तं श्राद्धं तत्र पौर्वापर्यं विधायकमिति। अथैवं
नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते। न सोष्यन्तीजातकर्मप्रोषितागतकर्मसु इत्यादिना छन्दोगपरिशिष्टोक्तनिषेधस्यानुपपत्तेः। तत्तत्कर्मणि श्राद्धविधायकवचनाभावात् सो
ष्यन्तीहोमः। स च सोष्यन्तीं शूल्लायन्तीं आसन्नप्रसवां ज्ञात्वा होमस्तु प्रसवे इत्यस्माज्ज्ञातो रिति भट्टभाष्यदर्शनात् दन्त्यादिः सैवं तेष्वपि गोभिलेन स्वोक्तगृह्यकर्मत्वेन श्राद्धविधानात् यथा।

सर्वाण्येवान्वाहार्यवन्ति अस्यार्थः सर्वाण्येव वक्ष्यमाणानि कर्म्माणि अन्वाहार्यवन्ति अन्वाहार्यं नान्दीमुखश्राद्धं दक्षिणा च तदुभययुक्तानि तथाचरस्यान्तरं । यच्छ्राद्धं कर्मणामा
दौ पात्रान्ते दक्षिणा भवेत् । अमावस्यां द्वितीयं यदन्वाहार्यं विदुर्बुधा । अतएव छन्दोगपरिशिष्टकृता यानि पर्युदस्तानि तानि सर्वाणि गोभिलोक्तानि । अत्र जातकर्मणि श्राद्धनिषे
धात्तद्विधायकं वचनं शाखान्तरीयं न चैवं सन्ध्यावन्दनादेर्गोभिलोक्तत्वात्तत्र कथं न वृद्धिश्राद्धमिति वाच्यं । यस्मादथातो गृह्यकर्म्माण्युपदेक्ष्याम इत्यादि पुनर्यज्ञविवाहयोः
पुनर्यज्ञविवाहयोश्चेत्यन्तस्तत्रूपा गृह्याग्निरेव । अथातः सन्ध्योपासनविधिं वक्ष्याम इत्याद्यमावस्यायां सर्वमिति इत्यन्तग्रन्थः सन्ध्यावन्दनस्नानतर्पणश्राद्धविधायकैः उभय
त्रैवशेषसूत्रे द्विवचनं ग्रन्थसमाप्त्यर्थमिति तत्र भाष्यव्याख्याने तर्हि न श्राद्धे श्राद्धं निषिध्यते इति पर्युदासानुपपत्तिरिति चेत्सत्यं गृह्यपरिशिष्टकादि श्राद्धविधानात् तस्मादेकाद
श्यादिव्रते गोभिलगृह्योक्तत्वाद्विशेषवचनाभावाच्च न वृद्धिश्राद्धमिति ॥ अथोपवाससमन्वयः ॥ भविष्ये उपावृत्तस्य पापेभ्यो यश्च वासो गुणैः सह । उपवासः स विज्ञेयः स
र्वभोगविवर्जितः । उपावृत्तस्य निवृत्तस्य पापेभ्यः पापकर्म्मभ्यः मैथिलास्तु दोषेभ्य इति पठित्वा । दोषेभ्यो रागद्वेषमात्सर्य्यादि निषिद्धात्मकधर्म्मेभ्य इत्यर्थमाहुः । गुणानाह गौ
तमः दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहा चेति कुर्य्यात् दयादिलक्षणान्याह बृहस्पतिः । परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा । आत्मव
द्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता । परे उदासीने आपत्सु रक्षितव्यान्विति कल्पतरौ पाठः । आत्मवदिति व्यक्तमाह दक्षः । यथैवात्मा परस्तद्वत् द्रष्टव्यः सुखमिच्छता । सुखदुःखानि तु
ल्यानि यथात्मनि तथा परे । बृहस्पतिः । वाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् । न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता । गुणान्गुणिनो हन्ति स्तौति मन्दगुणानपि । नान्य

९

दोषेषु रमते सानसूया प्रकीर्त्तिता। अभक्ष्यपरिहारस्तु संसर्गश्चाप्यनिंदितैः स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्त्तितं। शरीरं पीड्यते येन सुशुभेनापि कर्मणा। अत्यंतं तन्न कु
र्वीत अनायासः स उच्यते। प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनं। एतद्धि मंगलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः। स्तोकादपि च दातव्यमदीयेनान्तरात्मना। अहन्यहनि यत्किंचिदकार्प
ण्यं हि तत्स्मृतं। यथोत्पन्नेन सन्तोषः कर्त्तव्यो ह्यल्पवस्तुना। परस्याचिन्तयित्वार्थं सास्पृहा परिकीर्त्तिता। देवीपुराणे। तद्ध्यानं तज्जपः स्नानं तत्कथाश्रवणादिकं। उपवासकृतो ह्येते
गुणाः प्रोक्ता मनीषिभिः। सर्वभोगविवर्जितः श्राख्यानतु मतनृत्यगीतादिसुरतरहितः। अत्र मैथिलाः। हृष्यशातातपोक्तभोगविशेषान प्रतिप्रसूते। गंधालंकारवस्त्राणि पुष्पमाल्यानु
लेपनं। उपवासेन दुष्यन्ति दंतधावनमंजनं। गौडीयस्मृतिं। उपवासे तथा श्राद्धे न खादेद्दन्तकाष्ठिकं। दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलं। अत्र योगीश्वरः दन्तकाष्ठसंयोगो नि
षिद्धः परीक्षादिनादन्तधावनमिति विरोधं परिजहार इति वदन्तो नमर्थं व्याचक्रुः। तत्र हृष्यशातातपेन मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः। तस्मात्सर्वप्रयत्नेन भक्षयेद्दन्तधा
वनमित्यभिधाय एतद्वचनाभिधानेन दन्तधावने दोष एवोक्तः अन्यथोपानरुत्पापत्तेः। अंजनं रोचनं चापि गंधान् सुमनसस्तथा। पुरायके चोपवासे च नित्यमेव विवर्जयेदिति।
हरिवंशात्। मिताक्षरायां। गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं। व्रतस्थो वर्जयेत्सर्वं यच्चान्यद्बलरागकृदित्यनेन बलरागकृन्निषेधाच्च अत एव प्रायश्चित्तविवेककृद्भिः स्वय
मुक्तं उपवासे न हेतु नेति जीमूतवाहनेनापि उपवासे चेति पठित्वा चकारादनुक्तानक्तव्रतादिष्वपीति व्याख्यातं तस्माद्गंधेत्यादिवचनं सर्वभोगविवर्जित इत्यस्यैव प्रदर्शकं तथा च भुज
बलभीमे पुष्पालंकरणाभ्यंगं धूपगंधानुलेपनं। उपवासे प्रदुष्येत दन्तधावनमंजनं। तेन विलासार्थं गंधादिवर्जनं कार्यं देवलः। उपवासः प्रणश्येत दिवास्वप्नाक्षमैथुनैः। अत्यये

१८

चाम्बुपाने च नोपवासः प्रणाश्यति । उपवासोऽपि नश्येतेति कल्पतरुपाठेऽपि नाऽन्यव्रतं समुच्चीयत इति विशेषः । अक्षैर्द्यूतैः पाशकैरिति यावत् । अत्यये नाशे संभाव्यमाने मैथुने विशेष
माह देवलः । उपवासे तथायोनं हन्ति सप्तकुलानि वै । स्त्रीणां संप्रेक्षणात् स्पर्शात्ताभिः संकथनादपि । ब्रह्मचर्यं विपद्यते न दारेष्वृतुसंगमात् । संप्रेक्षणात् संकथनादित्यत्र सरागत्वं संश
ब्दार्थः साहचर्यात् स्पर्शेऽपि तथेति प्रायश्चित्तविवेकः । प्राश्नात्यनिशं यामे तेकात्यायनेऽपि रेतः सेकालकं भोगं न तेऽप्यत्र क्षयः स्मृतः । तथा च दक्षः । स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभा
षणं । संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च । एतन्मैथुनमष्टांगं प्रवदन्ति मनीषिणः । ऋतुगमनात् व्रतं चैतद् ब्रह्मचर्यविरोधकं । याज्ञवल्क्यः । षोडशर्तुर्निशाः स्त्रीणां तासु युग्मासु सं
विशेत । ब्रह्मचर्य्येव पर्वा   श्चतस्रस्तु वर्जयेत् । स्त्रीणां गर्भधारणायोग्यावस्थोपलक्षितः कालः ऋतुः स च रजोदर्शनदिनमारभ्य षोडशाहोरात्रात्मकः तस्मिन् ऋतौ युग्मासु समासु
रात्रिषु रात्रिग्रहणाद्दिवसप्रतिषेधः । संविशेत गच्छेत् पुत्रार्थं । एवं गच्छन् ब्रह्मचारी भवति अतो यत्र यत्र ब्रह्मचर्यं श्राद्धादिषु चोदितं तत्र तत्र गच्छतोऽपि ब्रह्मचर्यस्खलनदोषो नास्ति
किंतु पर्वाण्याद्याश्चतस्रो वर्जयेदिति मिताक्षरा । तत्र श्राद्धवासरे यदभिगमनमयुक्तं तदयुक्तं कल्पतरुधृतवचनविरोधात् । यथा श्राद्धानन्तरं शंखलिखितौ । ऋतुस्नातां तदहोरा
त्रं परिहरेत् नार्त्तवे दिवा मैथुनं व्रजेत् । क्लीबाश्चाल्पवीर्याश्च दिवा मैथुनेन प्रसूयन्ते अल्पायुषश्च तस्मादेतद्विवर्जयेत् । प्रजाकामः पितॄणां नो हवै तन्तुं विच्छिन्द्यात् प्रयतेताच्छेद
य येन प्रतिष्ठस्तस्मात् प्रतिष्ठाकामः प्रजया प्रतिष्ठेतेति । नोनिषेधे तन्तुं सन्तानं अच्छेदाय सन्तानस्य येन यस्माद् प्रतिष्ठः प्रजा अनुत्पत्त्या प्रतिष्ठः सन् पतति तस्मात् तदुत्पत्त्यर्थं यति
तव्यं पितॄणां । श्राद्धे निमुक्तो भुक्त्वा वा भोजयित्वा नियोज्य च । व्यवायी रेतसो गर्ते मज्जयित्यात्मनः पितॄन् तेन श्रेतो सह ऋतुना भुक्तादिषु न दोषः । एतत् पुत्रोत्पत्तिपर्यन्तं तथा च काल

10

माधवीये कूर्म्मपुराणे। ऋतुकालाभिगामी स्याद्यावत्पुत्रोऽभिजायते। ऋणापकर्षणार्थं हि पुत्रस्योत्पादनं प्रति। चतुर्थाहवर्ज्जनं प्रशस्तपुत्रार्थं चतुर्थी प्रभृत्युत्तरोत्तरं प्रजातिःश्रेय
सार्थमित्यापस्तम्बवचनात्। तदनर्थिनस्तु महाभारते। स्नातां चतुर्थदिवसे रात्रौ गच्छेद्विचक्षणः। शंखः। शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयोः। दैवे कर्म्मणि पैत्रे च पंचमे हनि शुद्ध्य
तीति इत्यादि॥ अथैकादशीभोजननिन्दा। विष्णुधर्म्मोत्तरे। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। एकादश्यां हि भुंजानो विष्णुलोकाच्च्युतो भवेत्। तथा प्रतिग्रासं स भुंक्ते तु किल्बिष
श्वानविट्समं। एकादश्यां द्विजश्रेष्ठ यो भुंक्ते चान्नं द्विजोऽमनाक्। भविष्ये। यानि कानि च पापानि ब्रह्महत्यादिकानि च। अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे। अघं स केवलं भुंक्ते यो
भुंक्ते हरिवासरे। तद्दिने सर्वपापानि भवन्त्यन्नाश्रितानि च। सनत्कुमारः। मद्यपानान्मुनिश्रेष्ठ पातेव नरकं व्रजेत्। एकादश्यन्नकामस्तु पितृभिःसह मज्जति। अत्र दोषश्रुतेर्नित्यत्वं अप्रत्य

१० एका

वयदकरणे प्रत्यवायस्तन्नित्यमित्युक्तं तथा च। नित्यं सदा यावदायुर्न कदाचिदतिक्रमात्। उपेत्यातिक्रमे दोषश्रुतेरत्यागचोदनात्। फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्त्तितं।
इत्यष्टधा नित्यत्वसाधकं। यत्तु फलाश्रुतेर्नित्यत्वमभिहितं तन्न फलाश्रुतौ विश्वजिन्न्यायात् स्वर्गः कल्प्यते इत्यनेन विरुध्यत इति अत्र न्याये विश्वजिता यजेते त्यश्रुताधिकारं लिंग
प्रकरणालभ्याधिकारं चोदाहरणं निषेधे हि सामर्थ्यात् प्रवृत्तिकिपो। धिकारी लभ्यते अंगविधिषु प्रकरणादिभिः संचिन्त्योधिकारः। एवं सतीह संदेहः किं नियुक्तोऽध्याह्रियते न
वेति अत्र चलोके द्वारमित्यादौ क्रियया विनाकारकाकांक्षाभिधानापर्य्यवसानाद्युक्तोऽध्याहारः इह तु विधेयेन कार्य्यस्यान्वितताभिधानपर्य्यवसानादनध्याहारे प्राप्ते उच्यते अत्राप्यभि
धेयापर्य्यवसानं द्वाराभिधानापर्य्यवसानमिव। कार्य्यं हि साध्यत्वेन कृतिनिरूप्यं नरव्यापाररूपा च कृतिः सा यथा स्वसाध्यधात्वर्थनिरूप्या एवं स्वाश्रयनवनिरूप्या च तदेवं कृतेः कर्त्ता-

विकार्य्यत्वमितिद्वारास्वसंबन्धित्वेन निरूपकइति तमन्तर्भाव्यैव नियोगधीः। एवंचरथयोगद्यतीत्यादावाख्यातेव्यापारलक्षणा। तदुक्तंभट्टपादैः। स्त्रीत्वाभावेपिभ्राद्वौचोरादिप्रत्ययोयथा। प्रयु
ज्यतेतथाख्यातंयत्नाभावेप्यचेतने। बाढ्रस्यादिगतंयत्नंवथादावुपचर्य्यते। उपपाद्यः प्रयोगोच सुखार्थानुपपत्तितः। नचासावबुद्ध्वा मनः कार्य्येन संबध्यं। स्वतत्त्वेनसंबध्यते स्वस
म्बन्धिकार्य्यबोद्धाचनियोज्य इतिस्थितेचिन्ता। किंसर्वेषामध्याहारः। उतएकस्येति तत्राविशेषात्सर्वेषामितिप्राप्ते उच्यते एकेनाकांक्षाशान्तेरेकस्येति। एवंस्थितेविचारः किंयस्यकस्य
चिन्नियोज्यस्याध्याहारः उतस्वर्गकामस्येतितत्राविशेषादनियमे प्राप्ते उच्यते स्वर्गीः स्यात्सर्वान्प्रत्यविशिष्टत्वादितिजैमिनिसूत्रात्स्वर्गकामएवाध्याहार्य्यः विशेषोहिगम्यते पुरुषाणां
सुखाभिलाषित्वात् दुःखनिवृत्तेरपितत्रैवान्तर्भावात् दुःखनिवृत्तिस्तु नसुखाविनाभूता सुषुप्तौ सत्यामपितस्यां सुखजन्मादर्शनात् अनवच्छिन्नसुखस्य स्वर्गत्वात्तस्यच सर्वसुखवि
शेषान्प्रत्यविशिष्टत्वात् विशेषेच मानाभावात्। स्वर्गएवनियोज्यविशेषणं स्यादित्युत्तरंमीमांसाकल्पतरुः। तदुक्तं यन्न दुःखेनसंभिन्नं नच ग्रस्तमनन्तरं। अभिलाषोपनीतंयत्तत्सु
खं स्वः पदास्पदं इतितस्मात्फलाश्रुतिमाचात् कथंनित्यत्वमिति चेदुच्यते। फलाश्रुतौ प्रकरणाभेदादुभयसमाधाने नित्यप्रकरणे नित्यत्वं काम्यप्रकरणे काम्यत्वमिति एवं चैकाद
शीव्रतस्य नित्यत्वात् किंचिदंगविकलस्यापि प्रधानोपवासादेराचरणं यावज्जीवाधिकरणन्यायात् सच न्यायो यथा यावज्जीवमग्निहोत्रंजुहुयादिति श्रूयते तत्र किंसर्वांगोपसंहा
रेणैवाधिकार उतयावज्जीवपदेन यावद्भिः शक्नोत्युपसंहर्तुं यदातदा तावद्भिरंगैरुपेतं प्रधानंकुर्वन्नधिकरोतीति संशयः। तत्रसर्वांगोपेतस्य प्रधानस्य फलसाधनत्वादंगवैकल्ये
फलानुदयात् सर्वांगोपसंहार इतिपूर्वपक्षः। अत्र सायंप्रातर्जुहोतीतिश्रुतेः। सायंप्रातःकालावच्छिन्नंजीवनमग्निहोत्रस्य निमित्ततया श्रूयते नत्वंगानां सति निमित्ते नैमित्तिकमवश्यंभावि

अन्यथानिमित्तत्वासंभवात् अतोसकलांगपरित्यागेन प्रधानं कर्त्तव्यं तावतैवशास्त्रवशात् फलसिद्धिः। अतएवनित्येनैमित्तिकाधिकारे श्रीधरधृताश्रुतिः यथाशक्नुयात्तथाकुर्य्यादितिवौ
धायनोपिस्मरति। यथाकथंचिन्नित्यानिशक्यवस्तुनिरूपितः। येनकेनापिकार्य्याणिनैवनित्यानिलोपयेत। शक्यवस्तुनिरूपितः शक्यं वस्तुनिरूपितंयेन सतथा। अत्र प्रधानालोपयेदि
त्यपेक्षयात्रधानमात्रमभिधानेगुणशक्तिरभिहितवत्प्रकाशतइतिन्यायात्। अतएवात्यन्ताशक्तौगोतमः। मनसाचैवंसम्यगाचरमनुपालयेदापत्कल्पइति तस्मात्सायंप्रातःकाला
वच्छिन्नजीवनमात्रेग्निहोत्रहोमोविधीयते योगियाज्ञवल्क्येपिसर्ववस्थापि योविप्रः सन्ध्योपासनतत्परः। ब्राह्मण्याचुनहीयेत अन्त्यजन्मगतोपिसन्। सर्वावस्थोपि निन्दितसेवादि
कइति मिताक्षरासम्यक्शौचाद्यसमर्थइति कल्पतरुः। अन्त्यजन्मगतः त्र्यहेणशूद्रीभवति ब्राह्मणः क्षीरविक्रयादितिमन्वाद्युक्तः। एवंचसम्यगाचमनाद्यसमर्थानामंधादीना ११ ए
मपि नित्येकर्म्मणि सन्ध्यादावधिकारः अतएवनकेनापिमुनिनातेषामनधिकारउक्तः। किन्तुक्वचित्काम्येसर्वेशक्त्यधिकरणन्यायात्तेषामनधिकारः अतएवतिथिविवेके स्वर्गा
कामश्रुतेः सामान्यप्रवृत्तायाः समर्थनरगोचरोपसंहारोऽन्यादिपक्षेदर्शपौर्णमासादेर्वाधइत्युक्तं अनेनकाम्यएव दर्शादौविशेषोऽभिहितः एवंचनित्येवाक्यान्तरश्रुतस्यस्वर्गादेर्न
भाव्यत्वंसर्वदातस्येष्टत्वासंभवादविवेकिनामेवतदिच्छा विवेकिनांपुनः स्वर्गोपि पातभीरुत्वात्क्षयिष्णोर्नास्तिनिष्कृतिरितिन्यायाद्धेयबुद्धिः ततश्चसर्वावस्थासाधारणेच्छागोच
रतयाउपात्तदुरितक्षयएवभाव्यः। यद्यपि विहितस्याननुष्ठानान्निन्दितस्यचसेवनात्। अनिग्रहाच्चेन्द्रियाणां नरःपतनमृच्छति। इतियाज्ञवल्क्यवचनादकरणेभाव्यनिष्टपरिहारार्थत्वं
संभवति तथापितद्विधिवाक्येस्तुभावनायाएवविधेयत्वात्तस्याश्चकिंकेन कथमित्यपेक्षितांशत्रयवत्त्वाच्चांशंविनाविधिरूपासिद्धेः। तत्कालीनाकरणजन्यप्रत्यवायपरीहारस्यतत्

प्रतियोगिनः कदाचिदनुत्पन्नात्यन्ताभावरूपस्य नित्यतयाभाव्यत्वायोगात् विधिप्रत्ययेन चस्वस्यैव भाव्यत्वप्राप्तेर्धात्वर्थादेर्भाव्यत्वायोगादश्रुतफलेषु विश्वजिदादिषु दुरितक्ष
यस्य दुरितानिष्टत्वोपाधिकेच्छाविषयत्वात् तत्त्यागेन निरुपाधिकेच्छाविषयस्वर्गस्यैव भाव्यत्वावधारणेपि नात्र तथेति कर्तृणां कदाचिद्भगवदनुग्रहाद्वैराग्योत्पत्तौ स्वर्गेपीच्छा
निवृत्ते यावज्जीवानुष्ठेयकर्म्मसु स्वर्गस्य भाव्यत्वानुपपत्त्या सर्वस्य सर्वदेहागोचरत्वात् दुरितक्षय एव भाव्यः कल्प्यते धात्वर्थरूपाणि भावनायां केनेत्यपेक्षितकरणत्वेनान्वीयन्ते
विधाने चानुवादे च यागः करणं मिष्यते इति न्यायात् प्रकरणस्य कर्तृव्यापारलक्षणस्येति कर्त्तव्यताक्षेपे काकवक्रव्यापारं विनासंभवात् कथमित्यपेक्षिते श्रुत्यादिसमर्पितांगजा
तान्येव भाव्यं भावयन्तीति। तत्र पूर्वजन्मार्जितं चैव तथेहापि च जन्मनि। ऊनषोडशवर्षेण यथा स्यात् किल्बिषं कृतं। पश्चाद्धर्म्मप्रवर्त्तेन तत्सर्वमुपशाम्यतीति वचनादिप्राप्तानां दुरितानां
क्षयः तथा च तैत्तिरीयश्रुतिः। धर्म्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्म्मिष्ठं प्रजा उपसर्पन्ति धर्म्मेण पापमपनुदन्ति धर्म्मे सर्वं प्रतिष्ठितं तस्माद्धर्म्मं परमं वदन्तीति जाबालभवि
ष्यपुराणे क्षयं केचिदुपात्तस्य दुरितस्य प्रचक्षते। अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते। नित्यक्रियां तथा चान्ये ह्यनुषंगफलं श्रुतिं नित्यक्रियां नित्यक्रियायाः श्रुतेः तां प्रा
प्यतिशेषः। ततश्च फलस्य कर्म्मनिष्पत्ते स्तेषां लोकवत् परिमाणात् फलविशेषः स्यादिति न्यायेन नित्यकर्म्माणि कृष्यादिषु दृष्टसाधनवत् साधनकर्म्मानुरूपेण। किंचित् किंचित्
हृत्वा दुरितानि नाशयन्ति प्रकरणाभावि प्रत्यवायानुत्पादनाय च भवन्ति। तथा चापस्तंबः प्रयोजयिता अनुमन्ता कर्त्ता चेति सर्वे स्वर्गनरकभोक्तारो योऽभूयः प्रारभते तस्मिन् फले विशेषर-
ति एवं फलं विनाप्यनुष्ठानं नित्यानां निष्यते स्फुटमिति भविष्यपुराणीयं पापक्षयानुषंगिकफलातिरिक्तफलपरं। तथा च यमः। सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति

ब्रह्मलोकमनामयं । शंसितव्रताः दृढव्रताः एतेनानुषंगिकं फलं मुमुक्षूणां मोक्ष एव अन्यथा तेषामनर्थापत्तेरन्येषां त्वन्यथापीति शारीरकभाष्ये आपस्तम्बः । आग्नेय फलार्थे निर्मिते छाया
याग पद्यते एवं धर्मैश्चर्यमाणो अर्था उत्पद्यन्ते इति शाक्यसम्पादनेष्वपि यदंगं विस्मृतं स्यात् तस्याप्यशक्यान्तर्भावात् तदभावेपि फलं भवत्येव किन्त्वत्र सांगार्थमच्युतस्मरणादिकं वि
धेयं यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमिति स्कन्दपुराणात् । एकादश्युपवासस्य यथा कथंचित् कर्त्तव्यत्वेनोपदेशाच्च यथा तत्र साग
रः । प्रसंगादथवा लोभाद्वा लोभाद्विदशाधिप । एकादश्यां मनः कृत्वा सर्वदुःखाद्विमुच्यते । नारदीये व्याजेनापि दत्ता रजनने नोदर्शयति सान्तकं । सा एकादशी अन्तकं यमं । कात्यायनो
पि तं सारस्सागरोत्तारमिच्छन् विष्णुपरायणाः । ऐश्वर्यं सन्ततिं स्वर्गं मुक्तिं वा यद्यदिच्छति । एकादश्यां न भुंजीत पक्षयोरुभयोरपि । यद्यप्येकेनापि एकादशी द्वादशी च तत्रोपोष्य क्रतोः फलं । अहो

१२

रात्रेण चैकेन ब्रह्महत्यां व्यपोहतीति भविष्यपुराणादि फलमर्थवादमात्रं वर्णितं तत्र अधिकारिविशेषणापेक्षया अर्थवादिकफलस्वीकारस्य रात्रिसत्राधिकरणन्यायेन कर्त्तुमुचि
तत्वाद्ब्रह्महत्यादिव्यपोहनस्यापि फलत्वात् ब्रह्महा द्वादशीपुक्तैकादश्यामुपवसेदिति विहितं हीन तम ब्रह्मवधविषये रहः प्रायश्चित्तं संभवति इत्यमीमांसकवचनं हेयमिति जी
मूतवाहनः । स च न्यायश्चतुर्थाध्याये चिंतितः प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीति श्रूयते तत्र रात्रिशब्देनार्थेन आयुरथैष ज्योतिरित्यादिवाक्यविहिताः सत्रनामकाः सोमया
गविशेषाः उच्यन्ते किमत्र स्वर्ग एवाधिकारिविशेषणमुत प्रतिष्ठेति संशयः अत्रैवं कामः इत्यश्रवणाद्विधिशक्तिलभ्यः स्वर्ग एव विशेषणं संदेहे सति वाक्यशेषस्वीकारो न निश्चये नित्य
तश्च रुसर्वाभिलषितः स्वर्गो विधिसामर्थ्यात्त्रियोज्यविशेषणं यतु प्रतिष्ठाविषया श्रुतिः सापि रक्षणाया स्वर्गपरेव कल्प्यते इति प्राप्ते क्रतौ रात्रिसत्रादौ न प्रातिष्ठादिफलं विवक्षितमिति हे -

वर्जैमिनिसूत्रे कर्तृणां फलमर्थवादमङ्गवत् कार्ष्णाजिनिरिति। यथा प्रयाजाद्यङ्गेषु फलश्रुतिरर्थवादरूपा तथा कर्तृणां रात्रिसत्रादौ प्रतिष्ठादिफलमर्थवादमाह कार्ष्णाजिनिरित्येवं प्राप्ते
सिद्धान्तसूत्रे फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यादिति प्रतिष्ठाफलस्य निर्देशात्तदेवाधिकारिविशेषणं यत्तु विधिशक्त्या स्वर्ग इति तन्न मुख्यार्थस्तुतिवादानुग्रायेन विधिशक्तौ
पर्यवसितायामानुमानिकायाः स्वर्गकल्पनाया अनवकाशात् सर्वथा फलाश्रुतावेव स्वर्गानुमानं तस्माद्वाक्यशेषस्थमेव फलमित्यात्रेयो मुनिराह ततश्च प्रतिष्ठाकाम आपुत्रायेजेत इ
त्यादिविषयः कल्पान्ते महाभारते सायमाद्यन्तयोरह्नोः सायंप्रातश्च मध्यमे। उपवासफलं प्रेप्सुर्वर्ज्यं भक्तचतुष्टयं। अत्र सायमित्यविवक्षितं हविरुभयत्ववत् भक्तचतुष्टयव
र्जनस्यैव विवक्षितत्वात्। अतएव वराहे। सायमित्यनुक्त्वा यथा अह्नो वाद्यन्तयो भक्तमेकैकं मध्यतो द्वयं। धर्म्मोपवासे कुर्वीत नैव भक्तचतुष्टयं। चातुर्भक्तनिषेधोऽयमुपवा
सविधिः स्मृतः। पाश्चात्यनिर्णयामृते स्मृतिः। जस्याद्भक्तद्वयं नित्ये काम्ये भक्तचतुष्टयं। भक्तद्वयवर्जनमशक्तस्य शक्तस्य तु नित्येऽपि भक्तचतुष्टयवर्जनं। शक्तिमांस्तु प्रकुर्वी
त नियमं सविशेषणं नित्यं च नित्यकाम्यत्वेन विधानाभेदात् सूर्यैकादशीव्यवस्थाया पूर्णामुपवसेत् कामी निष्कामस्तूत्तरां सदा इत्यादिवचनेन विधानभेदात् कालभेदाच्च
नित्यकाम्यत्वप्रतिपादकतत्तद्वचने एकादश्युपवासव्रतस्य नित्यत्वं काम्यत्वं च तत्र कालाभेदस्थले काम्यकरणे नित्यसिद्धिरित्युक्तं। ननु काम्यत्वमनित्यत्वं असति कामे प
रित्यक्तुं शक्यत्वात्। तथा सत्येकस्य कर्म्मणो नित्यत्वकाम्यत्वाभ्यां द्वैरूप्याङ्गीकारे नित्यानित्यसंयोगविरोधः। मैवं संयोगपृथक्त्वन्यायात्। स च न्यायः खादिरे पशुं बध्नाति खादिरं
वीर्यकामस्य यूपं कुर्वीत इति श्रूयते। अत्र संशयः किं काम्यस्यैव खादिरता नित्येऽपि स्यात् उत नेति तत्र फलार्थत्वेनानित्यतया नित्यप्रयोगाङ्गतानुपपत्त्या यत्तु नित्येऽपि खादिरत्वश्रवणं

13

तत्र काम्यस्यैव पशुत्वं धनोपयुक्तत्वपरत्वाश्रयत्वात्तादर्थ्यं । अतो न नित्यस्य खादिरत्वं वर्तते इति प्राप्ते ऽध्वान्त्ययजेः भिन्नस्त्रं । एकस्य तूभयत्वे संयोगपृथक्त्वमिति अत्र संयोगः सम्बन्धमात्रं पृथक्त्वं
भेदविशेषः एकस्य खादिरस्य क्रत्वर्थत्वपुरुषार्थत्वरूपोभयार्थकत्वे वाक्यद्वयेन कृतशेषत्वफलशेषत्वलक्षणसंयोगभेदोपगमान्न नित्यानित्यसंयोगविरोधः । न चाश्रयज्ञानार्थं नित्य
वाक्यं सन्निधानादेव आश्रयलाभात् अत उभयार्थो खादिर इति एवं दध्नाजुहोति दध्नाइन्द्रियकामस्य होमं कुर्वीत इत्यादावुभयार्थत्वे विदधित्वस्य द्वैधाश्रवणात् । ननु विषमो दृष्टान्तः नि
त्यः खादिरः क्रत्वर्थः काम्यस्तु पुरुषार्थः उपवासस्तु नित्योऽपि पुरुषार्थः न हि स क्रत्वर्थः क्रत्वर्थे प्रमाणाभावात् सत्यं प्रमाणद्वयस्य द्वैरूप्य प्रयोजकस्य केवलपुरुषार्थोपवासेऽपि सत्वात् अ
वैषम्यं यदि च बुद्ध्यारोहसदृशदृष्टान्तोऽपेक्षितस्तदाग्निहोत्रादिर्दृष्टान्तः न हि स क्रत्वर्थः किन्तु स्वयमेव क्रतुः पुरुषार्थोऽपि तथा च यावज्जीवमग्निहोत्रं जुहोतीति नित्यत्वबोधकं वाक्यं
अग्निहोत्रं जुहुयात् स्वर्गकाम इति काम्यत्वबोधकं यस्य पर्णमयी जुहूरित्यत्र नोभयार्थत्वं द्वैधाश्रवणाभावात् अत एव नारायणोपाध्यायेन दधिखादिवदित्यायेन शिखावद्धोपवी
तधारणायाः उभयार्थत्वमुक्तं कल्पतरुकृतापि ब्रह्मचारिकाण्डे पंचमादिषु वर्षेषु योनित्योपबन्धः कामानां पवन्धाश्च श्रूयन्ते ते संयोगपृथक्त्वेन नित्याः काम्याश्च यथा पैठीन
सिः गर्भपंचमेऽब्दे ब्राह्मणमुपनयेत् । मनुः ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पंचमे इति ब्रह्मवर्चसं वेदाध्ययन तदर्थस्नान प्रकर्षकृतं तेजः । उपनीयेते त्यनुवृत्तौ आपस्तम्बः अर्थ
कामं सप्तमे ब्रह्मवर्चसकाममष्टमे आयुष्कामं दशमे अन्नादिकाममेकादशे इन्द्रियकामं द्वादशे पशुकाममिति राज्ञि त्रिति ये चान्तराणो बलार्थिनः षष्ठ इत्यादीनां कामनोप
बन्धेनैव स्मरणात् तेषां काम्यत्वं किन्तु स्वरूपसिद्धस्तस्मादेवोपनयनरूपसंस्कारोऽपि नित्यः सिद्धः गोदोहनापं प्रणयनसिद्धं यथा क्रतूपकारार्थं चमसेन पुनः प्रणयनं नापि त्रिवर्षा-

१२ ए

स्योपनयन मात्रं कनीयं तच्च विशेषात् स्वेरवेनानुष्ठानाक्षेपस्यासत्वात् भावावादिना यथा नप्राशनमित्युक्तं । ग्रंथैव मान्युदयिक श्राद्धं नित्यं काम्यं च देवीपुराणे अष्टकाद्यभ्युदय
स्तीर्थपात्रोपपन्नयः । पितृणा मतिरेकोयं मासि कान्ता ध्रुवः स्मृतः । मासिकान्नाद मावास्या श्राद्धादय मतिरेकोऽष्टकादि श्राद्धकालो ध्रुवश्चावश्यकः । विष्णुः । आदित्यसंक्रमणं वि
षुवद्वयं विशेषेणायनद्वयं व्यतीपातो जन्मर्क्षमभ्युदयश्च एतांस्तु श्राद्धकाला नवेकस्यानाह प्रजापतिः । श्राद्धमेतेषु यद्दत्तं तदानन्त्याय कल्पते । अभ्युदयो विवाहादिः । तत्र विवा
हान्तसंस्कारांग कनांदीमुखश्राद्धे पितुरधिकारमाह छन्दोगपरिशिष्टं । स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु । पिंडानोद्वाहनात्तेषां तदभावे पितत्क्रमात् सुतसंस्कारक
र्मसु सुतसंस्कार ग्रहणात् पुत्रस्य विवाहान्तरे पित्राभ्युदयिकं न कार्यं आधेनसंस्कार सिद्धेः द्वितीयादेस्तदजननात् तथा चाश्वलायन गृह्यपरिशिष्टं सीमन्तोन्नयनं प्रथमे ग
र्भे सीमन्तोन्नयनसंस्कारो गर्भपात्रसंस्कार इति श्रुतिरिति गर्भपात्रयोरयं गर्भपात्रः गर्भस्य उदरस्थस्य पात्रस्य तदाधारस्य स्त्रियाः इति कल्पतरुः । हारीतेपि । सकृत्तु कृतसंस्का
राः सीमंतेनाकुर स्त्रियः । यं यं गर्भं प्रसूयन्ते स गर्भः संस्कृतो भवेत् । अत्र सकृत्संस्कृतपात्र जातानां सर्वेषां संस्काराभिधानेन प्रत्येक कृतजातकर्मादि संस्काराणां सुतरां सकृ
त्वं सकृत कृते कृत : शास्त्रार्थ इति न्याय च पिण्डानिति श्राद्ध परं कन्यापुत्रविवाहेष्विति श्राद्धविधायकविह्नपुराणैक वाक्यत्वात् तदेकवाक्यतया च सुतपदं कन्यापुत्रपरं न च ग्रह
नादित्यत्राभि विधावाङ्‌न्त दृष्टा वितु संस्कार्य्य क्रम वाधक पितुरभावे पुनरन्य : संस्कार्यः सपिंडादिर्वा तत्क्रमात् चित्रं कर्मपथानेकैर्गैरुन्मील्यते शनैः । ब्राह्मण्य मपि तद्वत्स्यात्
संस्कारैर्विधिपूर्वकैः इत्यंगिरसो क्रमफलभागितया प्रधानस्य तस्य संस्कार्यस्य क्रमात् तेषां पितॄणां दद्यात् ततः संस्कार्यस्य पित्रादित्रय मातामहादित्रयेभ्यः श्राद्धं कुर्य्यात् न च संस्का

15

र्य्यपि तरमादाय तेषां पितुः संप्रदानभूतानां तत्क्रमादित्यनेन पितृप्रवेशात् तत्प्रपितामहेतरयं चानामिति नारायणोपाध्यायमतं युक्तमिति वाच्यं पित्रानुप्रवेशेन संस्कार्य्यस्य पि
तृपितामहप्रपितामहानां श्राद्धितमातामहपक्षस्यैव पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवं । अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेदित्यनेन युक्तत्वात् नवा तेषां संस्कार्य्येतरपितृ
णां संस्कार्य्यपितुः पितृगणमातामहगणानां वा ग्रहणं तत्क्रमादित्यनन्वयापत्तेः आद्ये संस्कर्तुरनुपात्तत्वात् तद्वृद्धादनुपपत्तिः द्वितीये तेषामित्यनेनैव तेषां प्राप्तिरिति एवं चाभ्यु
दयमात्रस्य नित्यत्वाद्द्वितीयविवाहे पीतरागवद्वोढुराभ्युदयिकश्राद्धमावश्यकं सर्वाणपे वान्वाहार्य्यवन्नीत्यत्र मत्वर्थीयेनाविशेषाद्दंगत्व प्राप्तेः । न च अस्तष्ट्रयानि कर्म्माणि क्रिये
रन्नकर्म्मकारिणा । प्रतिप्रयोगं नैवस्यु मातरः श्राद्धमेव चेति छंदोगपरिशिष्टान्नतत्राभ्युदयिकश्राद्धमिति वाच्यं तस्यासकृत्वोनव येषां नियतकरणमुक्तं तत्परत्वात् न त्वनिय
तपुनःकरणकर्म्मपरं । अतएव यानि कर्म्माणि पुनःपुनः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं क्रियन्ते वैश्यदेवबलिकर्म्म दर्शपौर्णमासश्रावणाग्रहायणादीनि तेषु प्रथमप्रयो
गएव श्राद्धं मातृपूजा चेति । परिशिष्टप्रकाशप्रभृतिभिर्नियतपुनःपुनः कर्म्मस्वेव विषयो दर्शितः विष्णुपुराणेपि नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा । इत्यत्र बालानामि
तिवकुत्वेन निर्दिष्टं अतएव ब्रह्मपुराणं विवाहस्य शुद्धत्वेन छंगहेतुरित्याह यथानान्दीमुखेभ्यः श्राद्धन्तु पितृभ्यः कार्य्यमभ्युदये । ततो विवाहः कर्त्तव्यः शुद्धः शुभसुतप्रदः
अतएव मुखदर्शनात् हत्तो श्राद्धप्रसंगः स्याद्विवाहवादिति श्राद्धविवेकः । एतेन पुत्रविवाहादौ वृद्धिश्राद्धं नैमित्तिकमित्युक्तमपि निरस्तं । सपितुः पितृकृत्येषु अधिकारो न विद्यते ।
इति छंदोगपरिशिष्टे न जीवत्पितृकस्यावश्यकश्राद्धनिषेधोपि अंगत्वादेव निषेकादौ जीवत्पितृकेनापि जीवत्समतिदद्यादित्यनेन पितामहादीनां वृद्धिश्राद्धमावश्यकं क्रि

१४ ॰

यते। जीवत्पितृकादिना क्रियमाणे श्राद्धे पित्रादिस्थाने पितामहाद्यूहमाह विष्णुधर्मोत्तरं। येषां श्राद्धं पिता दद्यात्तेषामेव स कारयेत्। मंत्रोहेन च कर्त्तव्यं तेषां श्राद्धं नराधिप। स इ
तिजीवत्पितृकः प्रतिनिधिनात् अमुकस्य पितरित्याद्यभिलापप्रयोज्यं मंत्रे तु न तथेति वक्ष्यते। एवं च वृद्धिश्राद्धं यदर्थं कृतं तत्कर्म्म चेत्तद्दिने विघ्नादिना न क्रियते तदा दिनान्तरे तत्
कर्म्मणि तदंगत्वेन पुनर्वृद्धिश्राद्धकरणं प्रधानस्याक्रिया यत्र सांगं तत्क्रियते पुनः इति छंदोगपरिशिष्टे न सांगकरणाभिधानात् नांदीमुखे छंदोगैर्यैः पितृश्राद्धं न कार्यं न योषिद्भ्यः
पृथग्दद्यादवसानदिनादृते। स्वभर्तृपिंडमात्राभ्यस्तृप्तिरासां यतः स्मृता इति छन्दोगपरिशिष्टे निषेधात् न चास्ति योषिद्भ्यः पृथक् दद्यादिति वाच्यं तथात्वेऽवसानदिनादृत इति व्यर्थं
स्यात् तथाहि परिप्राप्ते योषितां श्राद्धे पृथक्त्वं विधीयते किं वा पृथक् श्राद्धं विशिष्टं विधीयते नाद्यः अमावस्यादौ योषिद्दानाप्राप्तौ कथं तदनूद्य पृथक्त्वमात्रविधानं नान्त्यः न
दाहि अवसानदिनादृत इति व्यर्थं स्यात् अवसानदिने तु स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतं। मृताहनि यथान्यायं नृणां यद्वदिहोदितं। इति मार्कण्डेयपुराणीयेन श्राद्धप्राप्तेर्विशि
ष्टविधित्वानुपपत्तेः तस्मादवसानदिनादृत इति वाक्यस्य सार्थकत्वाय पृथक्पदमेवानुवादः न च वैपरीत्यं तथात्वे वाक्यानुवादः स्यात् अव्ययपदानुवादे तु विभक्तेर्न तु वाद
कतेति एवमेव शान्न्यायाचार्य्याः। तस्मान्मातृश्राद्धन्तु पूर्वं स्यात् पितृणां तदनन्तरं ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं इति शातातपवचनात् अन्वष्टकास्वष्टकाव
दग्नौकरणादेव पूर्वमेवं रात्रे पितामहस्य प्रपितामहस्य पूर्ववद्ब्राह्मणान् भोजयेत्त्वेति विष्णुसूत्रात् मृताहनि तु कर्त्तव्याः स्त्रीणामप्युत्तरक्रियेति विष्णुपुराणात् वृद्ध्यन्वष्टकावसान
दिननिमित्तकश्राद्धेषु छंदोगोऽवसानदिनव्यतिरेकेण योषिद्भ्यो दद्यात् ततश्च योषिद्भ्य इति विशेषणस्वार्थकत्वाय तासां दानाभावे तत्र तस्य योषितां कथं तृप्तिरिति

15

चेत् अमावस्यादिसामान्यनिमित्तात् प्राप्ताभ्यः स्वभर्तृपिंडमात्राभ्यः छंदोगस्त्रियोषितां तत्प्राप्तिः तत्रापि कथं तत्प्राप्तिरिति चेत्। सपिण्डीकरणा दूर्ध्वं यत् पितृभ्यः प्रदीयते ।
सर्वेष्वंशहरा माता इति धर्मेषु निश्चय इति शातातपवचनात् न च छंदोगेतरोद्दृष्ट्याद्यैयोषिद्भ्यः पृथक्श्राद्धं दद्यादिति वाच्यं विधेयप्रागर्थापोषकत्वेन स्वभर्तृपिंडमात्राभ्यो यत
स्तत्प्राप्तिरित्यनन्वयापत्तेः किन्तु नयोषिद्भ्य इत्यस्य योषिदितरेभ्य इत्यर्थत्वे दृष्ट्याद्यैयोषित्संप्रदानकविधीनां छन्दोगेतरकर्तृकत्वं प्रतीयते यजमाने क्षितं हविर्यु होतीत्यस्याधात्
रोधे स्वर्गकामपदस्यांकेतर परत्ववत् अथवानयोषिद्भ्य इत्यस्य छंदोगेतरोद्दृष्ट्याद्यैयोषिद्भ्यः पृथक्श्राद्धं दद्यादित्येवार्थः। ननु तर्हि दृष्ट्याद्यै छंदोगयोषितां कथं तत्प्राप्तिरित्याकांक्षा
मुत्थाप्य उत्तरा द्वाचनय इति अनष्टकार्यां तु निरग्नीनामेवानधिकारः विष्णुवचने होमवत्त्वादेवाग्निप्राप्तिराग्निग्रहणांतन्नियमार्थं न चानग्नीनामग्नौकरणा होमे विप्रपाणायादेर्वि
धानादत्रापि तथेति वाच्यं। प्रकृतिभूतश्राद्धविध्युक्तस्य विकृतिभूतश्राद्धविशेषविहिताधारेणाबाधात् शरमयबर्हिषा कुशमयबर्हिर्बाधवत् न वा लौकिकाग्नौ होमः न पैत्र्य
त्रिये होमो लौकिकाग्नौ विधीयते इति मनुना निषेधात् वाचस्पतिमिश्रोप्येवं ॥ अथैकादश्युपवासव्रताधिकारिणः ॥ नारदीये। तावत्यापानि देहेस्मिंस्तिष्ठन्ति च नराधिप। या
वन्नोपवसेजन्तुः पद्मनाभदिनं शुभमिति । अत्र जन्तुपदश्रवणादधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः। भुक्ते यो मानवो मोहादेकादश्यसि पापकृत् इति कालमाधवीयधृतनारदव
चने च मर्त्यमानवपदयोः श्रवणाच्च मानुषमात्रस्याधिकारो न जात्याश्रमविचारः। यत्तु अनाश्रमित्वं गृहभंगकारणा दतो गृहं अमनुत्तमं द्विज।। अनाश्रमस्थैरपि वेदपारगैर
हं न गन्तव्यानि कृतं यदर्चनमिति ततपूजनपरमिति अतएव अलोभे चैव कन्यायाः स्नातकव्रतमाचरेदिति पैठीनसिनाप्युक्तं। एवं च नित्योपवासी यो मर्त्यः सायंप्रातर्भुजिक्रियां।

स्या।२

१५ ए

संत्यजेन्मतिमान् विप्रः संप्राप्ते हरिवासरे इति। कात्यायनवचने मर्त्य इत्यभिधानानन्तरं विप्र इति पदं तस्याधिकदोषार्थं अन्यथा मर्त्यपदवैयर्थ्यापत्तेः। न च अनड्वान् ब्रह्मचारी च
आहिताग्निश्चते त्रयः। अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् इति स्मरणात्। साग्निब्रह्मचारिणोरनधिकार इति वाच्यं हेमाद्रिधृताग्निपुराणवचनेन तयोरप्यधिकारावगमात् यथा
गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च। एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। सभर्तृकाया व्रतोपवासादिः पृथक् निषिद्धो मनुना नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं।
पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते। विष्णुनापि। भर्तुः समानव्रतचारित्वं भर्तृव्रताचरणे तदानुकूल्यकारित्वं यच्च तु सावित्रीव्रतादौ विशेषविधिस्तत्र भर्त्रनुज्ञया पृथगिति यथा
शंखः। कामं भर्त्रनुज्ञातव्रतोपवासनियमेज्यादीनामभ्यासः स्त्रीधर्म इति। यत्तु पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्। आयुः संहरते पत्युः सा नारी नरकं व्रजेत् इति विष्णूक्तं तद
ननुज्ञातविषयं कात्यायनः। विधवायां भवेन्नारी भुंजीतैकादशीदिने। तस्यास्तु सुकृतं नश्येद्भ्रूणहत्या दिने दिने। जीमूतवाहनः। एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि इति विष्णु
धर्मोत्तरमत्स्यपुराणवचने उभयपक्षीयैकादश्यां मांसमैथुनवर्जनविधानमिति वाच्यं वानप्रस्थस्यापि। एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि। वनस्थयतिधर्मोऽयं शुक्लामे
व सदा गृही इति गोभिलवचनात् गृहिणः शुक्लपक्षैकादश्यामेवाधिकारः न च गृहीतरपरत्वे कृष्णैकादश्याः कथं दशम्यां नियताहारो मांसमैथुनवर्जितः मैथुनादिसंभवात् अत एव
पुराणे ऋषिकुमाराः श्रूयन्ते पुत्रेषु भार्यां निःक्षिप्य वनं गच्छेत् सहैव वा इति मनुवचनात् तस्य मांसभोजनमप्याह बौधायनः। अथ वानप्रस्थस्त्रैविध्यं पचमानका अपचमानका
श्चेत्युपक्रम्य कियद्दूरे स्वतो वसितमानमांसं व्याघ्रवृकश्येनहतमित्येवमादिभिरन्यैर्वाहृतमानीय अपयित्वा सायं प्रातरग्निहोत्रं कृत्वा यत्यतिथिव्रतिभ्यश्च दत्वा अथेतरत् शेषम

16

स्याइति मधुमांसवर्जनं तु वनस्थानां समांसवृत्तीनामित्यादि तस्मात्कथं दशम्यां। नियताहारमित्यादिवचनबलादपुत्रस्य गृहिणोऽप्युभयैकादश्युपवासव्रतमिति। तथा इन्दुक्षयेऽर्क
संक्रान्त्यामेकादश्यां सितेतरे। उपवासं न कुर्वीत पुत्रबन्धुधनक्षयादिति वायुपुराणवचनेन बन्धुपदश्रवणाच्च। नहि बन्धुमान्यः कश्चिद्गृही पितृभ्रात्रादिषु बन्धुपददर्शनात् बन्धुपद
स्थाने धवेति क्वचित्पाठः। तत्रापि तथेति यच्च न कुर्य्यात् पुत्रवान् गृहीत्यत्र पुत्रवानिति पदं तत्पुत्रवतां वानप्रस्थादीनामपि निषेधार्थमित्याह हेमाद्रिरपि शुक्लामेव सदा गृहीति वच
न पर्य्यालोचनया सकलकृष्णैकादशीषूपवासाभावप्राप्तौ शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति ब्रह्मवैवर्त्तवचने शयनबोधनमध्य
वर्त्तिकृष्णैकादशीषूपवासविधानात् तास्वेवापुत्रवद्गृहिणोऽधिकारोऽन्यत्र प्राप्त्यभावात् सामान्यविशेषयोर्विकल्पासंभवात् पर्य्युदास एव तेन शयनबोधनमध्यवर्त्तिकृष्णैकाद
शीष्वपि पुत्रवतो गृहस्थस्यानधिकार इत्याह अत्रोच्यते। गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति हलायुधहेमाद्रिधृताग्निपुराणव
चनेन गृहस्थमात्रस्य कृष्णैकादश्युपवासप्राप्तौ शुक्लामेव सदा गृहीति पुत्रवद्गृहिविषयं। तस्यैव कृष्णायां निषेधश्रुतेः। तथा चोपवासमधिकृत्य ब्रह्मपुराणं। एकादशीषु कृष्णासु
रविसंक्रमणे तथा। चन्द्रसूर्योपरागे च न कुर्य्यात् पुत्रवान् गृहीति। न च बन्धुमत्त्ववत् पुत्रवत्त्वमप्यप्रयोजकं बन्धुपदं दोषकथनायानुवादमात्रं न तु कर्तृविशेषणार्थं न कुर्य्या
त् पुत्रवान् गृहीति विधिवाक्ये पुत्रवानिति कर्तृविशेषणमिति विशेषः अत एव मीमांसायां आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति सूत्रेण आम्नायस्य वेदस्य क्रिया
र्थत्वात् कार्य्यार्थत्वात् प्रामाण्यं अतदर्थानां कार्य्याप्रतिपादकानां आनर्थक्यमप्रामाण्यमिति पूर्वपक्षयित्वा सिद्धान्तसूत्राभ्यां विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति क

१६ ए

चिद्भूतार्थानां च क्रियार्थेन समाम्नायादित्येताभ्यां क्वचिद्विधिशक्तिरेवावसीदन्ती स्तुत्यादिभिरुत्तम्भ्यत इति न्यायात् क्वचिद्भूतार्थानां सिद्धार्थानां क्रियार्थेन संहैकवाक्यत्वात् प्रामाण्यम
प्युक्तं अतो न कुर्यात् पुत्रवान् गृहीति निषेधविधौ पुत्रवत्त्वे नैवाधिकारित्वं अत्रैव त्वबन्धुधनक्षयादित्यर्थवादः अतः पुत्रवत एव गृहस्थस्य कृष्णायामनधिकारः । अत्रैव शयनबो
धनमध्ये प्रतिप्रसवः जीमूतवाहनस्तु यदीच्छेद्विष्णुनावासं पुत्रसंपदमात्मनः । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपीति । गृहिणो न निषिद्धं काम्यत्वात् । अत्र पुत्रार्थिनः सह
विधानं विष्णुना सहवासिनस्तु यावज्जीवाचरणां काम्येत्वादिदोषो नास्ति नित्येसइत्याह हेमाद्रिरपि केचित्तु वैष्णवस्य गृहिणः पुत्रिणो रुक्माङ्गदादेः कृष्णैकादश्युपवास
श्रवणात् सर्वेषामुभयैकादश्यां नित्यव्रतोपवासेऽधिकारः कृष्णादिनिषेधस्तु गृहिविषयः काम्य एवेत्याहुः । तत्र पुत्रवांश्चैव भार्यावान् धर्मयुक्तस्तथैव च । उभयोः पक्षयोश्चै
व काम्यं कुर्यात्तु वैष्णव इति वचनेन काम्य एवाधिकारो न नित्ये इत्याह । वस्तुतस्तु वैष्णवानां सपुत्राणां गृहिणामपि सर्वाः कृष्णा नित्याः । हलायुध हेमाद्रिधृत तत्त्वसागर वच
नात् तद्यथा । यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा । तुल्यते मन्यते यस्तु स वै वैष्णव उच्यत इति निर्णयामृतधृतवचनाच्च । तद्यथा नैकादश्यो त्यजेज्जन्तुर्यस्य दीक्षास्ति वै
ष्णवी । समात्मा सर्वभूतेषु निजाचारादविच्युतः । विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते । इत्येतत् सार्द्धवचनात् परं परमापदमापन्नो हर्षे वा समुपस्थिते इति स्कन्दपुरा
णे विशेषो माधवाचार्येणालिखितः । तत्र तुल्यत्वेन उभयैकादशीत्यागाभावादेव वैष्णवत्वप्रतीतिरिति अत्राचारसमर्पणोन्तं त्रिकोमंत्रो यथा कमदीपिकायां इतः पूर्वं प्राणबुद्धि
देहधर्माधिकारतो । जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयं च सकलं हरये सम

17

प्रिये। ॐ तत्सदिति च प्रोक्तो मंत्रस्त्वात्मसमर्पणे पौराणिकोऽयथा यत् किंचित् क्रियते देव सदा सुकृतदुष्कृतं। तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तं करोम्यहं कालमाधवीये नारदः। नित्यं भक्ति
समायुक्तैर्नरैर्विष्णुपरायणैः। पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणं। अत्र विष्णुपरायणानां पक्षे पक्षे चेति वीप्सया यावत्पक्षाण्येवैकादश्युपवासस्य नित्यता प्रतीतेः श्रीपतिव्य
वहारनिर्णये। शुक्ले वा यदि वा कृष्णे कृष्णपूजनतत्परः। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति वचनात् नित्यं भक्तिसमायुक्तैरित्यनन्तरं स पुत्रश्च सभार्यश्च स्वजनैर्भक्तिसंयुतः।
एकादशीमुपवसेत् पक्षयोरुभयोरपि। ब्रह्महा च सुरापश्च स्तेनो गुरुतल्पगः। विवेचयति येऽमोहादेकादश्यां सितेतरे। गृहस्थो ब्रह्मचारी च आहिताग्निर्यतिस्तथा एकाद
श्यां न भुंजीत पक्षयोरुभयोरपीति एतैर्हलायुधेन तथा व्यवस्थापितत्वात् वैष्णवानां तथा व्यवहाराच्च मुमुक्षुत्वेन सुतरामेव यथा भविष्य शुक्ला गृहस्थैः कर्त्तव्या भोगसन्तानवर्द्धि
नी मुमुक्षुभिस्तथा कृष्णा तेन तेनोपदर्शिता। वाराहेपि। यथा शुक्ला तथा कृष्णा उपोष्या च प्रयत्नतः। शुक्ला भक्तिप्रदा नित्यं कृष्णा मुक्तिं प्रयच्छति। द्विजन्मनो विशेषतोपि यथा गो
विन्दमानसे व्यासकृत्यमहार्णवयोर्भविष्योत्तरं। उभयोः पक्षयो राजन्नेकादश्यां द्विजन्मवान्। यो भुंक्तेऽनीरुजः सोपि प्रेत्य चांडालतां व्रजेत्। एतद्वचनं भविष्यपुराणीयमि
ति कृत्यकल्पलतायां सोपीत्यत्र सोऽधेति विशेषः कल्पतरुप्रभृतिषु पूर्वग्रन्थेषु कृष्णाया निषेधकं वचनं न लिखितं किन्तु समयप्रदीपे स्मृतिसागरे च गौडाः इति कृत्वा। लि
खितमिति। अत्र काश्चित्। आदित्यहनि संक्रान्त्या मसितैकादशी दिने। व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद् गृहीति ब्रह्मपुराणवचनादेकादश्यां रविवारादौ उपवासनिषेध-
माह उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेत्। उपवासेन दुष्येत उपवासफलं लभेदिति वराहपुराणादनोदनादिकमप्याह तत्र विष्णुधर्मोत्तरे। एकादश्यां यदा राम आदि

७ ५

दित्यस्य दिनं भवेत्। उपोष्या सा महापुण्या पुत्रपौत्रविवर्द्धिनी। भृगुभानुदिनोपेता सूर्य्यसंक्रान्तिसंयुता। एकादशी सदोपोष्या पुत्रपौत्रविवर्द्धिनी त्यादि वचनेषु एकादश्यां रविवारादौ
प्रत्युतानुषंगिक फलश्रुतेः। न च नित्ये निषेधका (पेता सूर्य्यसंक्रान्तिसंयुता। एकादशी सदोपोष्या सर्वसम्पत्करी तिथिरिति सनत्कुमारवचने पूर्वोपदर्शितवचने च) ष्येफल
श्रुतिर्जीमूतवाहनवाहनोक्तं युक्तं। भानुवारेण संयुक्ता तथा संक्रान्तिसंयुता एकादशी सदोपोष्या सर्वसम्पत्करी तिथिरिति सनत्कुमारवचने पूर्वोपदर्शितवचने च सदापदश्रुतेः
काम्यत्वाकामित्वरूपविशेषाभावात् किन्तु संक्रान्त्यादिषूपवासनिषेधस्तन्निमित्तोपवासपरः। तन्निमित्तोपवासस्य निषेधो यत्तदाख्यानः। नानुषंगकृतो ग्राह्यो पतो नित्यमुपो
षणा। मितिस्मृतेः संक्रान्त्यादिनिमित्तकोपवासः संवर्त्तेनोक्तो यथा अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः। एताः प्रशस्तास्तिथयो भानुवारस्तथैव च। अत्र स्नानं जपो होमो दे
वतानां च पूजनं। उपवासस्तथा दानमेकैकं पावनं महत्। तथा उपवासं च ये कुर्युरादित्यस्य दिने तथा। जपन्ति च महाश्वेतां ते लभन्ते यथेप्सितं। महाश्वेतामंत्रस्त्वागमे ह्रांसमित्यु
क्ताततः ह्रीन्तु सकारश्च विसर्गवान्। महाश्वेताख्यमंत्रोऽयं भानोस्त्र्यक्षरईरितः। संवत्सरप्रदीपे। सप्तवारांस्तु पोष्यैव सप्तधा संयतेन्द्रियः। सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति। कृते
श्राद्ध इति काम्योपवासविषयं। नित्यं तु वराहपुराणे विष्णुधर्मोत्तरकात्यायन उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्य्यादाघ्राय पितृसेवितं। यत्तु रविवारेर्क
संक्रान्त्यामेकादश्यां सितेतरे। पारणं चोपवासं च न कुर्यात्पुत्रवान् गृहीति पारणनिषेधो रविवारसंक्रान्तिप्राप्तोपवासनिषेधवत् रविवारसंक्रान्तिमात्रप्राप्तपारणपरः तयो
रेव पारणं तु प्रागुक्तशनिवारोपवासानन्तरं रविवारे नित्यं द्वयोरनययोर्नित्यं विष्णुव्रतोदयोः। चन्द्रार्कयोर्ग्रहणे पापे व्यतीपाते षुपर्वसु। अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपं। यः

करोति प्रसन्नात्मा तस्य स्यादक्षयं च तत् । इति ब्रह्मपुराणोक्तसंक्रान्तिपूर्वदिनोपवासविधानेन संक्रान्त्यां प्राप्नोतीति ॥ ० ॥ अथ पूर्णातिथिलक्षणं ॥ स्कन्दपुराणे प्रतिपत्प्रभृतयः सर्वा उ-
दयादोदयाद्रवेः । संपूर्णा इति विख्याता हरिवासरवर्जिताः । हरिवासर एकादशी । अतएव सौरधर्म्मे आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता । सैकादशी तु संपूर्णा विद्धान्या परिकी-
र्त्तिता । अत्र च तिथेरुदयान्तरावस्थितावपि यदुदयात् प्राक् संपूर्णत्वकीर्त्तनं तदुदयानन्तरं तत्तिथेः सत्वेपि षड्भिरेव कर्म्मेति हित्वा दसत्त्वख्यापनाय तथा च कालमाधवीये नारदीयं आ-
दित्योदयवेलाया आरभ्य षष्टिनाडिकाः । तिथिस्तु सा हि शुद्धा स्यात् सार्वतिथ्यो ह्ययं विधिः सूर्य्यसिद्धान्तेपि सर्वाप्येतस्य तिथय उदयादोदयात् स्थिताः । शुद्धा इति विनिर्द्देश्याः षष्टिनाड्यो
हि वै तिथिः । एतस्य रवेः । कालनिर्णये केचिद्दण्डात्मिकायाश्च तिथेर्निःक्रमणोपरे । अकर्म्मण्यं तिथिमलं विद्यादेकादशीं विना ॥ ० ॥ अथ पूर्णैकादश्युपवासः ॥ प्रचेताः ।
पूर्णापैकादशी त्याज्या वर्द्धते द्वितयं यदि । द्वादश्यां पारणालाभे पूर्णैव परिगृह्यते । द्वितयमेकादशी द्वादशी च । भृगुः संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया
तु परतो द्वादशी यदि । विष्णुधर्म्मोत्तर वृद्धवशिष्ठसंहितायां च । संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत् । उपोष्ये द्वे तिथी तत्र विष्णुप्रीणा
न तत्परैः । एवमेव गारुडे किन्तु मध्यार्द्धवचनमेवं त्रयोदशी उषःकाले उपोष्यात्र च का भवेत् इति । अत्र द्वैतनिर्णये एकादशीद्वादश्योरुभयत्र सर्वेषामुपवासविधानं तत्स्वच्छं शु-
कश्रद्धानजडविषयं । तदितरस्य श्रद्धादियुक्तस्य एकेनैवोपवासेनेत्यादिस्वोक्तहेतोर्वैकैकपुरुषस्य उभयत्राकांक्षाविरहात् विकल्पो युक्तः । तथा च भविष्ये । स्मृतिशास्त्रे । वि-
कल्पस्तु आकांक्षापूरणे सति । तेन साकांक्षत्व एव स्मृतीनां परस्परान्वयः सूचितः । अत्र नैष्ठाविकल्पोऽष्टदोषग्रासात् तथा च प्रमाणात्वा प्रमाणात्वपरित्यागप्राक्कल्पनात् ।

नफलसिद्धावितरवैयर्थ्यादिति चेन्न एकेनैवोपवासे २ मू

तद्यज्जीवनहानिभ्यां प्रत्येकमष्टदोषता। व्रीहिभिर्यजेत यवैर्यजेतेति श्रूयते तत्र व्रीहिप्रयोगे प्रतीतियवप्रामाण्यपरित्यागः अप्रतीतयवप्रामाण्यपरिकल्पनं। इदन्तु पूर्वस्मात् प्र
धगवाक्यं अन्यथासमुच्चयेपि यागसिद्धिः स्यात् अतएव विकल्पेनोभयः शास्त्रार्थ इत्युक्तं। प्रयोगान्तरे यवेऽपादीयमाने परित्यक्तयवप्रामाण्योज्जीवनं स्वीकृतयवप्रामाण्यहानि
रिति चत्वारो दोषा एवं व्रीहावपि चत्वार इत्यष्टौ दोषा इह विकल्पे तथाप्युक्तं एवमेवाष्टदोषोपि यद्व्रीहियववाक्ययोः विकल्प आश्रितस्तत्र न तिरन्या न विद्यत इति। ननु यदि पुरोडा
शाय व्रीहिनीतत्याग्नेयादिवत् समुच्चयरूपा गतिरस्तु इति चेन्न प्रकृतक्रतुसाधनीभूतपुरोडाशद्रव्यप्रकृतितया हि परस्परं निरपेक्षौ व्रीहियवौ विहितौ शक्नुतश्चैतौ प्रत्येकं पुरोडाशं
संपादयितुं तत्र यदि मिश्राभ्यां पुरोडाशं संपद्येत तदा परस्परानपेक्षव्रीहियवविधातृणी उभे अपि शास्त्रे बाध्येतामिति अथमाभूद्वाक्यद्वयसामर्थ्यात् समुच्चयः अंगसहितप्रधानानुष्ठा
नापेक्षकप्रयोगविधिर्व्रीहियवौ समुच्चेतुमर्हतीति चेन्न सहि यथाविहितान्यंगानि समीक्ष्य प्रवर्तमानो नैतानि अन्यथयति मिश्रणे चान्यथात्वं तेषामिति। ननु मामिश्रेतां व्रीहि
यवावुभयविध्यर्थसत्वानुवन्धाय एकस्मिन्नेव प्रयोगे व्रीहिभिर्वेकवारं यवैरप्यपवारमित्यनेन यागद्वयमेव निर्ज्यतामिति चेन्न अंगानुवोधेनाश्रुतप्रधानाभ्याससयायुक्तत्वात् ए
वं चानकेवलं व्रीहियवसमुच्चये प्रमाणाभावः। किन्तु प्रमाणविरोधोपि तथाहि पुरोडाशविधिनैव औषधिद्रव्ये यस्मिन् कस्मिंश्चित् प्राप्ते व्रीहयोपि पक्षे प्राप्ताः। अन्यौषधिप्राप्तिपक्षेऽ
प्राप्ताश्च व्रीहयस्तत्रापाङ्गांशपूरणार्था निरपेक्षव्रीहिश्रुतिर्व्रीहिभिरेवेति नियमं गमयेत् एवं च तत्र यवसमुच्चये निरपेक्षव्रीहिश्रुतिबाधः स्यादेवं च यवश्रुतेरपि नियमार्थ
त्वाद्व्रीहिसमुच्चये तद्बाध इति अतएवोक्तं गतिरन्या न विद्यत इति एकार्थतया विविधं कल्प्यत इति विकल्पः। तस्मादष्टदोषाभिपातपोष्यादितीयइत्यत्र नेह विकल्पः किन्तु व्य

19

वास्थितविकल्पः अतएवैतन्निर्णये स्कन्दपुराणे। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। उत्तरां तु यतिः कुर्य्यात् पूर्वामुपवसेद्गृही। कूर्म्मपुराणे। एकादशी प्रवृद्धा चेत् शुक्ले कृष्णे
विशेषतः। तत्रोत्तरां यतिः कुर्य्यात् पूर्वामुपवसेद्गृही। एतेन पारणादिने द्वादशीलाभे सर्वैरपूर्णांत्यक्त्वा खंडामुपवसेदिति तदलाभे गृही पूर्वां इतरे तूत्तरां विधवापीति लभ्यते।
एकादश्येव प्रकर्षेण वृद्धापरदिने निर्गतानदशमी नापि द्वादशीत्यर्थः। एवं पुनः प्रभातसमये घटिकैका यदा भवेत् तत्रोपवासो विहितो वनस्थस्य यतेस्तथा। विधवाया
श्चत्तथैव परतो द्वादशी न चेत्॥ ०॥ अथ त्रिस्पृशैकादशी॥ ०॥ यदा पूर्वदिने दशमी परदिने चैकादशी स्वल्पा ततो द्वादशी रात्रिशेषे त्रयोदशी तदा सैव सर्वैरुपोष्या
एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणमिति हलायुधधृत वचनात्। अत्र काश्चित् महाणीं वधृत विष्णुधर्म्मोत्तरे। एकादशी द्वादशी
च तच्छेषे च त्रयोदशी। त्रिः स्पृशा नाम तिथिः प्रोक्ता सर्वपापहरा स्मृता। उपवासः कृतस्तत्र महापातकनाशनः। तदेतद्वनस्थादीनां गृहिणां तु दिनक्षये तु संप्राप्ते त्यादिना निषेधा
दित्याह कालविवेककृदपि एकादशीति वचनं सौरधर्म्मोत्तरीयमिति। तथा एकादशी द्वादशी च तच्छेषे च त्रयोदशी। स्नानं दानं तपो होमं कृत्वा ब्राह्मणवाचनं। निवर्त्य द्वादशी
कर्म्म ततो नक्तेन वर्त्तयेत्। दिनक्षये तु संप्राप्ते नोपोष्य नियमो स्मृतो। उपोषे पुत्रनाशः स्यान्नियमे च धनक्षयः नियमे नक्तं तरश्चया हस्त दिनक्षयस्त्र्यद्धो तिथ्यन्तावेकवारे यत्र स
स्याद्दिनक्षय इति हेमाद्रिस्तु वृद्धशातातप वचनं। दशम्येकादशी विद्धा द्वादशी च क्षयं गता। क्षीणा सा द्वादशी प्रोक्ता नक्तं तत्र विधीयते। परिशेषखंडे स्कान्दे। एकादशी कलाय

१८ २

द्वादशी च क्षयं गता । नक्तं तत्र प्रकुर्वीत नोपवासो गृहाश्रमे । एवं च सूर्योदयरहितायास्तिथेः क्षयत्वं प्रतीयते । अत्र चोपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेदिति सामान्यशास्त्र
स्य नक्तविधायकविशेषशास्त्रेण बाधः । एकादशी कलाप्येका द्वादशी यत्र लुप्यते । तत्रोपवासं कुर्वीत निष्कामो विष्णुतत्परः इत्याहुस्म । अत्र परवचनपर्यालोचनया नक्तविधानं
कामिनः काम्यविषयं निष्कामस्य नित्योपवासार्थिनो विष्णुपरायणस्य गृहस्थस्याप्युपवास इति तत्त्वं अतएव नित्यं भक्तिसमायुक्त इत्यनेन पक्षे पक्षे नित्यमुपोषणमित्युक्तं द्वादशी
हानियुक्ता विद्धाधिकेति विद्धायाः सप्तमप्रकारे पूर्वोक्तरूपे सम्प्रदायानुव्यवस्थितिरित्यनेन स्ववाक्ये विश्वरूपेणापेक्षैव व्यवस्थोक्ता सा च पूर्वोक्तनिष्कामो विष्णुतत्पर इत्यन्तपर्या
लोचनयाभिहितेति । न चात्र निष्कामस्तु गृही कुर्यादुत्तरैकादशीं तथा । सकामस्तु सदा पूर्वां कुर्याद्बौधायनो ब्रवीदिति विष्णुरहस्यवाक्यात् सकामेन दशमीविद्धा कार्या नि
ष्कामेन द्वादशीयुतैकादशीति वाचस्पतिमिश्रोक्तपूर्वोपदर्शितनक्तबोधकवक्ष्यमाणदशमीविद्धानिंदाबोधकवचनविरोधात् विष्णुरहस्यानार्षत्वस्य दानसागरे निरुद्धम
देनाभिहितत्वाच्च यथा लोकप्रसिद्धमेतद्धि विष्णुरहस्यं शिवरहस्यं च द्वयमिदं न परिगृहीतं संग्रहरूपं च यत्नतोऽवधार्येति । यत्तु शिवरहस्यमिति निर्हृत्वा तिथिविवेकेऽभिहितं ।
तन्मुनिवचनस्य व्याख्यानसंवादाय अत्रापि विष्णुरहस्यं वक्ष्यमाणशुक्लपक्षीयारुणोदयकालवेधे वैष्णवावैष्णवगृहिविधिसंवादायेति । समयप्रदीपोपि यत्र तु पूर्वदिने दश
मीविद्धापरदिने द्वादशीमिश्रा दिनान्तरे च द्वादशी न वर्द्धते तदा द्वादशीमिश्रैवोपोष्या प्रधानकालावरोधात् पारणादौ द्वादशीबाध एव तन्मूलकमेव गौडीयं वचनं एकादशी द्वाद
शीमिश्रा परतोपि न वर्द्धते । गृहिभिर्यतिभिश्चैव सैवोपोष्या सदा तिथिः । एतद्धि स्पृशि त्रिस्पृशि च संभवत्यविशेषात् ॥ ० ॥ अथ दशमीविद्धैकादशी साद्विधा पूर्वाह्ने दशम्या उ

२०

त्रयोहि द्वादश्या च युता दशम्या निर्मुक्ता चेति तत्रोभयीं दशमीयुतामनुपोष्य पूर्वं च द्वादशीयुतामेकादशीमुत्तरत्र प्रभूतां द्वादशीमुपवसेत्। एकादशीमुपवसेत् द्वादशीमथवा पुनः
विमिश्रां वापि कुर्वीत न दशम्यायुतां क्वचित्। इति वचनाद्द्वयस्य मात्स्यवचनजातीयाश्च उत्तरपक्षे विशदो विवक्ष्यते यानि तु यानि दशमीविद्धानिंदाबोधकवचनानि तान्युभयतोवैधे द्रष्टव्या
नि दशमीमात्रविद्धा तु सैवोपोष्या। एकादशी न लभ्येत सकला द्वादशी भवेत्। उपोष्या दशमी विद्धा ऋषिरुद्दालकोऽब्रवीदिति। ऋष्यशृंगस्मृतेः क्षये पूर्वां तु कारयेदिति विश्व
रूपनिबन्धाच्च तिन द्वादश्युपवासः प्रमाणाभावात्। एकादशीमुपवसेद्द्वादशीमथवा पुनरित्यस्य राजाद्यलिखितत्वेनामूलकत्वादिति वर्द्धमानोपाध्यायपता चस्पतिमिश्रमत
तन्मतदुपजीव्य हरिनाथोपाध्यायेन महाजनपरिगृहीतत्वेन तद्वचनस्याभिधानात् नहि राजाद्यलिखितमेवाप्रमाणं रामायणादेस्तथापत्तेः। तस्मान्नानादेशीयसंग्रहका
र संवादादेव प्रामाण्यपरिग्रह इति नहि उपोष्या दशमीविद्धेति वचनं राजलिखितं तस्मान्नानादेशीयसंग्रहकारलिखितवचनसंवादादेव प्रामाण्यपरिग्रह इति। उपोष्या
दशमीविद्धा इत्यस्य विषय उदय पूर्वविधे वक्ष्यते न वा नानासंग्रहधृतनानामुनिवचनान्यनादृत्य संग्रहकर्त्ते विश्वरूपस्य वाक्या व्यवस्थापयुक्ता। तथा च समयप्रदीपे श्री
दत्तोपाध्यायाः। यदि तु एकादशीमुपवसेद्द्वादशीमथवा पुनः। विमिश्रां वापि कुर्वीत न दशम्यायुतां क्वचित् इति गौडीयवचनं प्रमाणं तदानेनैवं विधेये धे एकादशीका
ष्ये द्वादशी विधेये उक्त एव द्वादश्युपवासः न चेदं व्रतान्तरमेव एकादशीसन्दंशपाठात् अथ वेत्यनेन पूर्वपक्षितविधेश्च। पक्षहानौ स्थितेसो मे लंघये द्दशमीयुतामिति वाक्य
मुदयपूर्वकालीनदशमीयोगविषयं वचनान्तरवलादिति प्रपंचितं जितामित्यादिभिरित्याहुः। कालविवेकहात्य महार्णवयो भविष्यपुराणं। एकादशीं दशायुक्तां व

२० ख

वर्द्धमाने विवर्जयेत्। पक्षहानौ स्थिते सोमे लंघयेद्दशमीयुतामितिवर्द्धमाने सोमे शुक्लपक्षे पक्षहानौ स्थिते सोमे कृष्णपक्षे लंघयेदुपवसेत्। क्षययोगे स्थिते सोमे कुर्वी
त दशमीयुतामिति कालमाधवीयपाठे व्यक्त एवार्थः। केचित्तु विद्धाप्येकादशी ग्राह्या परतो द्वादशी न चेदिति। मुहूर्तं द्वादशी न चेदिति स्यात्त्रयोदश्यां यदा तदा। उपोष्या
दशमी विद्धा सर्वैरेकादशी तदेति त्रयोदश्यां पदानस्यात् द्वादशी घटिकाद्वयं। दशम्येकादशी विद्धा सैवोपोष्या सदा तिथिरिति रितिमत्स्यसूक्तार्कूर्म्मनारदीयवचनैरेवंभूता
दशमीविद्धैवोपोष्या। त्रयोदश्यां द्वादशी निर्गमे तु तत्र शुद्धैकादश्युपोष्या सकामस्तु तत्रापि दशमीविद्धैवा शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः। तथा निष्कामस्तु गृ
ही कुर्य्यादुत्तरैकादशीं सदा। सकामस्तु सदा पूर्वामिति बौधायनोऽब्रवीदिति विष्णुरहस्यवचनादिति वदन्ति। तत्र विद्धाप्येकादशीत्यादिवचनानां नानादेशीयसंग्रहका
रधृतनानावचनतत्तद्व्याख्यानादनुपदं विषयः स्फुटीभविष्यतितानासैविष्णुरहस्यवाक्यमपि उत्तरैकादशीमित्यभिधानान्नोक्तविषयं किन्तु वक्ष्यमानारुणोदयवेध
विषयं यदपि कुर्य्याद्दलाभे संयुक्तां नालाभेऽपि प्रवेशिनीं। उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणं। उदयात् प्राग्दशम्यास्तु शेषः संयोगइष्यते। उपरिष्टात्प्रवेशस्तु त-
स्मात्तां परिवर्जयेत् इत्यनयोः समूलत्वेऽपि अलाभे त्रयोदश्यां द्वादश्यलाभे संयुक्तां सूर्य्योदयात् प्राक् वक्त्रालोकनसमाख्ये दशम्या युक्तां घटिदंडाक्तिकामेकादशीं
कुर्य्यादित्यर्थः। द्वादश्यां पारणालाभे पूर्वैव परिगृह्यत इति प्रचेतोवचनैकवाक्यत्वात् इति भावः। लाभे तु संयुक्ता न ग्राह्या अलाभविशेषणसामर्थ्यवशात् पूर्णाप्येका
दशी त्याज्या इत्यनेनैव श्रुतिमूलत्वाच्च। नालाभेऽपि प्रवेशिनीमिति द्वादश्यास्त्रयोदश्याम निर्गमेऽपीत्यर्थः। यत्र दशमी सूर्य्योदयात् परतः परदिने चैकादशी द्वादशी। रा-

21

त्रिशेषे त्रयोदशी चेति त्रिस्पृशा तत्र दशमीविद्धैकादशी निषेधकमिदं । अयमाशयः एकादश्यां प्रकुर्वन्ति उपवासं मनीषिणः । उपवासनाषद्वादश्यां विष्णोर्यद्वदियन्तथेति भ
विष्यपुराणवचनात् परदिने द्वादश्यां विष्णूपासनार्थत्वमेकादश्युपवासस्यावगतं तत्रोक्तविषये दशमीविद्धैकादश्युपवासमन्तरेण न सम्भवति सोपपत्तिस्त्वित्याशंक्योक्तं उपोष्य
द्वादशीं तत्रेति एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । तत्र क्रतुशतं पुण्यमिति वचना त्रयोदश्यामिति न तद्वादश्यां विष्णुपूजां कृत्वा पुण्य प्राप्तिः । न चैकादश्याः परदिने द्वादशी स
म्बन्धे द्वादश्युपोष्येत्यसंगतं । एकादशीयुक्तद्वादश्या अपि द्वादशीत्वाक्षतेरित्याहुः तदप्यश्रद्धेयं यताजीमूतवाहन हलायुध प्रभृतिभिस्तद्वचनमभिहितं यथाश्रुते व्याख्यातं च
हेमाद्रिमाधवाचार्य प्रभृति धृतवचनांतरसत्वादिशिष्टाचारपरिगृहीतं च ततश्च तद्वचनस्यार्थान्तरकल्पनं कल्पनमेव तथाहि एकादशीमुपवसेद् द्वादशीमथवा पुनः । वि २१ ए
मिश्रां वापि कुर्वीत न दशम्या युतां क्वचित् इत्यभिधाय कुर्याद् लाभे इत्यादि वचनद्वयं कौर्मे स्वाभिहितं नामूलकं तत्र प्रकृतत्वात् दशम्यायुत नित्यस्यैवापवादकं विधायकं च
कुर्याद्लाभे इत्यादिना संयुक्तैकादशीकरण विधानाद् लाभ इत्यचापि एकादश्या एव परदिने ऽलाभ इति प्रतीयते न तु त्रयोदश्यां द्वादश्या अप्रलाभे इत्यत्र पास्थितेः । यातिथिः स्पृ
शते राजन् प्रातर्वक्त्रावलोकिनीं । सा विज्ञ इति विज्ञेया इत्येनेन सौरधर्मेत्तिरवचनेन वक्त्रावलोकनसमये प्रातर्दशमीस्पर्शाद्धेय एवोक्त इति न वा पूर्णा या दशमी योगित्वेन निषेधो येन तदा
पवादायत द्वचनं किंतु पूर्णात्वेनैव निषेधः । यत्तु तत्तु भवदुक्त विषये पूर्णात्वमेव नास्तीयदुक्तं पूर्वोक्तिवाक्यत्वे तदपि न भवदुक्त विषये पूर्णात्वायोगात् तथा च सौर धर्मे ऽप्रादित्योदयवेलायाः

प्राङ्मुहूर्त्तद्वयान्विता । सैकादशीति संपूर्णा विद्धान्या परिकीर्त्तिता इत्यनेनएकादशीपूर्णत्वस्य सूर्य्योदयप्राक्कालीनमुहूर्त्तद्वयान्वितत्वेन विशिष्याभिधानात् । स्कान्देपि प्रतिपत्
प्रभृतयः सर्वा उदयादोदयाद्रवेः । संपूर्णा इति विख्याता हरिवासरवर्जिताः । अतस्तदुक्तपूर्णाविषये पूर्वा या विद्धत्वात् परैकादश्युपोष्या कुर्य्याद्दलाभे संयुक्तामित्यनेन द्वादश्या
मेकादश्यलाभे संयुक्तां प्रातर्वेन्त्रावलोकनविद्धां कुर्य्यात् । अर्थाद्वादश्यामेकादशीलाभे तादृशविद्धां न कुर्य्यादित्यवगतेः तत्र परोपोष्येति गम्यते । एतद्विषये षष्टिदंडा
त्मिकायाश्च तिथेर्निःक्रमणोपरे । अकर्म्मण्यं तिथिमलं विद्यादेकादशीं विनेति संगच्छते तथा च कालमाधवीये गारुडं । आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः संकी
र्णैकादशीनाम त्याज्या धर्म्मफलेप्सुभिः । अत्रापि त्रयोदश्यां द्वादशीलाभ एव परोपोष्येत्यवधेयं नो चेत्तत्र पूर्वा तु पोष्य परदिने द्वादश्याः आद्यपादमुत्तीर्य्य पारणां कुर्य्यात् ति
थ्याप्येकादशीन्नाह्यापरतो द्वादशी न चेदित्यादि प्रागुक्तवचनेभ्यः । अथैवं विद्धपूर्णयोर्व्यवस्थायां अविशेष इति चेद्द्वादश्यां पारणालाभे पूर्वैव परित्यज्यत इति अविशेषात् -
वैष्णवेनापि पूर्णा पोष्या अरुणोदयविद्धा तु द्वादशी पारणास्यालाभेपि वैष्णवैर्नोपोष्या । किन्तु खण्डैकादश्युपोष्येति विशेषः । दशमीशेषसंयुक्तो यदि स्यादरुणोदयः । नैवोपोष्यं वै
ष्णवेन तद्दिने एकादशीव्रतमिति गारुडे वैष्णवेनेत्यभिधानात् तत्रापि कृष्णपक्षेऽरुणोदयविद्धैवोपोष्य शुक्लपक्षे न तथेति विशेषः । एकादशीं दशायुक्तां वर्द्धमाने विवर्जयेत् । प
क्षक्षीणोस्थिते सोमे संध्ययेद्दशमीयुतामित्येकवाक्यत्वात् । एतत्तु शुक्लपक्षीयैकादशीसम्वादाय निष्कामस्तु गृही कुर्य्यादुत्तरैकादशी सदा । सकामस्तु सदा पूर्वामिति बौधायनो ब्र
वीदिति विद्धरहस्यवाक्यमिति । अथारुणोदयविद्धोत्तरैकादशी पूर्णोत्तरैकादशी वा द्वादश्यां त्रयोदश्यामनिर्गमे सर्वैरेव कथं नोपोष्यते । एकादशी द्वादशी च परतो द्वादशी न चेत्

तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणा मितिवचनादिति चेन्न अस्योदयोपरिविद्धैकादशी परदिने विषयसंभवान्नारुणाविद्धापूर्णा विषयकविशेषवचनबाधकत्वमिति। प्रसक्त
न्नतेतु नालाभेपि प्रवेशिनीमित्यनेनालाभेपि परदिने एकादश्यलाभेपि सूर्योदयानन्तरं वेधमात्रनिषेधः भवतां मते परदिन एकादशीलाभ एवेति संकोचः स्यात्। उपोष्याद्वा
दशीत्यत्र द्वादशीपदस्य एकादशीयुक्तद्वादशीपरत्वे प्रमाणं नास्ति लक्षणा च स्यात् किन्तु द्वादशीमथवा पुनरित्यस्य प्रवेशिन्यन्तरितकेवलद्वादशीपरत्वप्रदर्शनार्थं नालाभेपि
प्रवेशिनीमिति तथा च कालविवेके जीमूतवाहनः। एकादशी दशाविद्धा परतोपि न वर्द्धते। गृहिभिर्यतिभिश्चैव सैवोपोष्या सदा तिथिरिति भविष्यपुराणीयात् दशा दशमीत्यत्र
द्वादशीदिने एकादशीकलार्द्धमात्रस्याप्यनिर्गमे दशम्याविद्धैकादश्युपोष्येति प्रचरति शास्त्रार्थः। स तु सौरधर्मोत्तरकूर्म्मपुराणादिविरुद्धः तथा च सौरधर्म्मोत्तरे। एकाद
शीमुपवसेत् द्वादशीमथवा पुनः। विमिश्रां वापि कर्त्तव्या न दशम्या युता क्वचित्। कौर्म्मे। एकादशीमुपवसेत् द्वादशीमथवा पुनः। विमिश्रां वापि कुर्वीत न दशम्या युतां क्व
चित्। कुर्य्याद्दलाभे संयुक्तां नालाभेपि प्रवेशिनी। उपोष्या द्वादशी तत्र त्रयोदश्यान्तु पारणं। उदयात् प्राग्दशम्यास्तु शेषः संयोग इष्यते। उपरिष्टात् प्रवेशस्तु तस्मात्तां परिवर्ज
येत्। अस्यार्थः द्वादश्यां कलार्द्धमात्रमप्येकादश्या अनिर्गमे यदि दशमी नोदयं स्पृशति तदा संयुक्तोच्यते। सैवोपोष्या अथोदयं स्पृशति तदा सैव प्रवेशिनीपदवाच्या तां वि
हाय द्वादशीमेवोपवसेत् तदिदमुक्तं नालाभेपि प्रवेशिनीमिति। सैव धर्म्मे सूतउवाच। कीदृशस्तु भवेद्वेधो योगो विप्रेन्द्र कीदृशः। योगवेधौ समाचक्ष्व याभ्यां दुष्टमुपोषणं। व्या
सउवाच। यत्तिथिः स्पृशते सूत प्रातर्वह्न्यावलोकिनी। स वेध इति विज्ञेयो योगः सूर्योदयो मतः। सूर्योदयात् प्रागन्योन्यमुखावलोकनयोग्यं प्रातःकाले यदि दशमी स्पृशति न तूदयं

२२ ए

सवेध इति परिभाषितं । यस्य कूर्म्मपुराण वचने शेषः संयोग इष्यत इत्यनेन संयोग उक्तः । सोऽनेन सवेध इत्यनेनोक्तः यस्य तूपरिष्टात् प्रवेशः स्यादित्युक्तः संयोगः सूर्य्यादपि मत इत्यनेनोक्तः
परिभाषितत्वादेवास्य परस्परविरोधो न वाच्यः । तेन सूर्य्योदयकाले दशमीस्पृष्टैकादशी न कदाचिदुपोष्या किं त्वेकादशी निषेधवत्तु न निषेधवत्तु वा द्वादश्येवोपोष्या यदातु वक्त्रावले
कनमात्रं स्पृशति दशमी नोदयं परदिने चैकादशी न निःसरति तदैकादशीं न निःसरतीति तदैकादशीं वेधवतीमुपवसेत् एकादशी द्वादशीयुक्तेत्यादि दशमीयुतामिति दशम्यापि हि इ
त्यादिकमप्यस्मिन्नेव विषये बोद्धव्यमित्याहुः स्म । स्मृतिमहार्णवे भोजदेवोप्येवं वचनमाह एकमेव कालकौमदीतस्मात् पूर्वोक्तमत्स्यकूर्म्मनारदीयपुराणवचनानां दिग्मोहेन्द्र
समापुक्ते क्षये हनि तथापरे । उपवासस्तु पूर्वेद्युर्नोपवासः परेहनीति विष्णुधर्म्मोत्तरीयस्याप्यरुणोदयविषयत्वेनैव व्यवस्था न तु व्यवस्थान्तरं जीमूतवाहनधृत कूर्म्मपुराणसौ
र धर्म्मोत्तरवचनविरोधात् । एवमन्यान्यपि वचनानि व्याख्येयानि संवत्सरप्रदीपे हलायुधोप्येतन्मतानुसारी मन्त्रिदमधिकमुक्तवान् । तद्यथा अरुणोदयवेलायां दशमीसंगता
यदि । उपोष्या द्वादशी शुद्धा त्रयोदश्यान्तु पारणं । दशमीशेषसंयुक्तो यदि स्यादरुणोदयः । वैष्णवेन न कर्त्तव्यं यद्दिनेकादशीव्रतमित्यादि वचनेषु अरुणशब्द आदित्यवाचको
बोद्धव्यः । अरुणो भास्करेपि स्यादित्यभिधानात् तस्मादेकादशी त्याज्या दशमीपलमिश्रिता । उपोष्या द्वादशी शुद्धा त्रयोदश्यान्तु पारणं । यत्तु द्वादशद्वादशीर्हन्ति त्रयोदश्यां तु
पारणमिति तत्परदिने द्वादशीलाभे तां त्यक्त्वा पारणे बोध्यं । हेमाद्रिरपि दशमीविद्धायामुपवासानुपवासविधायकानि वचनानि यथाक्रमं सकामनिष्कामविषयकानि । य
था कूर्म्मे । द्विस्पृगेकादशी यत्र तत्र सन्निहितो हरिः । तामेवोपवसेन्मर्त्यः सकामो विष्णुतत्परः । दशमीद्वादशीं च यास्पृशति स एकादशी त्रिस्पृक् । स्मृतम् । सत्यव्रतौ दिनक्षये च शुद्धा

२३

द्वादशीं मोक्षकांक्षिभिः। उपोष्या दशमीविद्धा नोपोष्यैकादशी सदा। एतच्च स्मृतिमात्रेणादशमीविद्धा नोपोष्या शुद्धा द्वादश्युपोष्या यथा पितामहः। एकादशीदिनक्षये उपवासं करोति यः। तस्य पुत्रा विनश्यन्ति मघायां पिंडदो यथा। दिनक्षये तु संप्राप्ते नपोष्या दशमीयुता। यदीच्छेत् पुत्रपौत्राणां वृद्धिं सम्पदमात्मनः। एकादश्यां यदा वत्स दिनक्षयतिथिर्भवेत्। तत्रोपोष्या द्वादशी स्यात् त्रयोदश्यां तु पारणं। व्यासः। दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते। एकादश्यां महाप्राज्ञ उपवासः कथं भवेत्। शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः। पारणं तु त्रयोदश्यां पूजयित्वा जनार्दनं। भविष्ये। दशमीशेषसंयुक्ता यदि स्यादरुणोदयः। वैष्णवेन न कर्त्तव्यं तद्दिनैकादशीव्रतं। ब्रह्मवैवर्त्ते। चतस्रो घटिका प्रातररुणोदय उच्यते। यतीनां स्नानकालोऽयं गंगाम्भः सदृशः स्मृतः। त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयं। नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते। तथा नन्दा शरीरं देवस्य भद्रा स्यान्मोक्षयो मतः। तस्मात्सरोगत्यक्त्वा गमात्मानमुपवासयेत्। नन्दा एकादशी भद्रा द्वादशी तथा वरमेकादशीत्याज्या न कार्या दशमीयुते त्यरुणोदयनिषेधवाक्यं यदा द्वादश्यां किंचिन्मात्राप्येकादशी दृश्यते त्रयोदश्यां च किंचिन्मात्रा द्वादशी दृश्यते तदा। पूर्वत्याज्या इत्येतत् परं काम्यैकादशीव्रतविषयं वा। अरुणोदयकाले तु दशमी यदि दृश्यते। तत्रैकादशी कार्या धर्मकामार्थसाधिनीति श्रवणादित्याह पाश्चात्यनिर्णयामृते भविष्योत्तरीयं। अरुणोदयकाले तु दशमी यदि दृश्यते। सा विद्धैकादशी तत्र पापमूलमुपोषणं। भविष्यपुराणीय मे तदिति माधवाचार्य्यः। ततश्चारुणोदयवेधे तु भागवतैर्नोपवासः कार्य्यः। स कालः स्कान्दे उक्तः यथा उदयात्प्राक् च तस्रस्तु नाडिका अरुणोदयः। तत्र स्नानं प्रशस्तं स्यात्तद्धि पुण्यतमं स्मृतं। विद्धा दशमीवेधस्तूदये निषिद्धः दशम्याः प्रान्तमादाय यदोदेति दिवाकरः। तेनानिष्टं हरिदिनं तद्दत्तमसुरा पठ(?) इति स्मृतेः। अत्र दत्तं जन्मासुराय त्विति माधवाचार्य्यः पठति। कालमा

२३ स

धवीयव्रतमेवैवर्ते।कीदृशस्तु भवेद्वेधो योगो विप्रेन्द्र कीदृशः।योगवेधौ समाचक्ष्व याभ्यां दुष्टमुपोषणं।चतस्रो घटिका प्रातररुणोदयनिश्चयः।चतुष्टयविभागोऽत्र वेधादीनां किलोदि
तं। अरुणोदयवेधः स्यात् सार्द्धं तु घटिकाद्वयं। अतिवेधो द्विघटिका प्रभासन्दर्शनाद्रवेः। महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते। तुरीयस्तत्र विहितो योगः सूर्योदये बुधैः। तथा पातुधान
व्रते योगे महावेधस्तु राक्षसे। ज्येष्ठास्तु रस्यातिवेधो मोहितो वेधनेशिनीत्यनेन तत्र देकादशीफलं तत्तद्दस्तरः प्राप्नोतीति विशेषः घटिकादण्डः। उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदय इति
स्कान्दनारदवचनैकवाक्यत्वात्स्कन्दः। उदयोपरि विद्धा तु दशम्यैकादशी यदि। दानवेभ्यः प्रीणनार्थं दत्तवान् पाकशासनः। गारुडे दशमीवेधसंयुक्तोऽपदिस्यादरुणोदयः। नैवोपोष्यं वैष्ण
वेन तद्दिनैकादशीव्रतं। उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता। संपूर्णैकादशी ज्ञेया तत्रैवोपवसेद्गृही इति वचनजातात्सूर्योदयानन्तरविद्धा सर्वैरेव न पोष्या। अरुणोदयविद्धा तु
वैष्णवैर्नोपोष्या इत्याह तेन जीमूतवाहनादीनां सूर्योदयानन्तरं दशमीविद्धैकादशीं परित्यज्य शुद्धां द्वादशीमुपोष्य त्रयोदश्यां पारणमिति वर्तुलार्थः। तथा च कालनिर्णये स्मर
ति। अतिवेधा महावेधा ये वेधास्तिथिषु स्मृताः। सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये सति। एवं सूर्योदयकालीनवेधः सर्वथा त्याज्यः। अरुणोदयवेधे तु प्रतिप्रसवस्यापि सत्त्वात्कु
त्रचित्संग्राह्यत्वमिति। तत्र गौडानां विशेषतो देशाचारादुदयोपरिविद्धा सर्वथा न पोष्या॥ तथा च राजमार्तण्डे भोजराजः। देशाचारस्तावदादौ नियोज्यो देशे देशे या स्थितिः सैव कार्या।
लोकद्विष्टं पण्डिता नाचरन्ति शास्त्रात्ता नो लोकमार्गं गायायात्। दैवज्ञ इति क्वचित्पाठः। तत्रापि हेतुवन्निगदा विशेषइति। मरीचिः। येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः। तत्र तं
नावमन्येत धर्मस्तत्रैव तादृशः। त्वचतं नावमन्येत धर्मस्तत्रैव तादृशः। येषु देशेषु ये देवा येषु स्थानेषु ये द्विजाः। येषु स्थानेषु यत्तोयं या च यत्रैव मृत्तिका। सेवतत्रैव पूज्या स्यात्तेन कृत्यं

24

विधीयते अतएव यत्र न्यायागमयोर्न निश्चायकता। तत्रापि योगिनो सर्वज्ञस्य धर्म्मतत्वसाक्षात्कारासंभवात् शिष्टाचारं प्रमाणमाह व्यासः। तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नचान्द्ये दर्शनम
प्तिकिंचित्। धर्म्मस्य तत्वं निहितं गुहायां महाजनो येन गतः स पन्थाः। स्कान्दे। येषां विश्वेश्वरे विष्णौ शिवे भक्तिर्न विद्यते। न तेषां वचनं ग्राह्यं धर्म्मनिर्णयसिद्धये। कालमाधवीये। यस्मिन्दे
शे यस्मिन्काले ये शिष्टेषु नीरागद्वेषस्य स्वस्य प्रामाण्यातिशयबुद्धिस्तदा ताहशस्याचारस्य मुख्यत्वमिति एतदभिप्रेत्य गुरोः शिष्यानुशासने तैत्तिरीयाः समामनन्ति अथ यदि ते धर्म्म-
विचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्यग्दर्शिनो युक्ता आयुक्ता वा अरुक्षा धर्म्मकामाः स्युर्यथा ते तत्र वर्त्तेरन् तत्र तथा वर्त्तेथा इति सम्यग्दर्शिनः शास्त्रतत्पराः युक्ताः युक्तिकुशलाः आ
युक्तास्तदर्थानुष्ठानकुशलाः अनुष्ठाननिरताः इति यावत्। अरुक्षाः क्रोधवर्जिताः धर्म्मकामा जीवन्मुक्तवत्कर्म्मण्यौदासीन्यमकुर्वाणा इति। अतो दशमीविद्धा निन्द्या वचनानि। अवि
द्धे पाद्दशम्यनिर्दिष्टायामपि यथा स्कन्दपुराणे। दशम्येकादशीविद्धा गान्धारी तामुपोषिता। तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्। तथा सुराया बिन्दुनास्पृष्टं यथा गांगं जलं त्यजेत्।
तथैवैकादशीं स्यां दशम्यां दूषितां त्यजेत्। ये कारयन्ति कुर्वन्ति दशम्येकादशीयुतां। आलोक्यं तन्मुखं ब्रह्मन् सूर्य्यदर्शनमाचरेत्। यैः कृता दशमीविद्धा जडवाक्यानुमानवैः। ते गच्छन्ति नर
कं घोरं युगानामेकविंशतिं। ब्रह्मवैवर्त्ते। दशमीशेषसंयुक्तां यः करोति विमूढधीः। एकादशीफलं तस्य नश्यद्द्वादशवार्षिकं॥ तत्र संक्षेपः। पारणादिने द्वादशीलाभे सर्वैरेव पूर्णाप्येकादशीमु
पवसेयुः तदलाभे गृहिणां पूर्णा तदन्यः परा विधवापि। यदा तु पूर्वदिने दशम्या उत्तरादिने द्वादश्या युक्तैकादशी तदा उत्तरामुपोष्य द्वादश्यां पारणं कुर्य्यात्। परदिने द्वादश्या निर्गमे त्रयोदश्या
मपिति सूर्य्योदयानन्तरं दशमीयुतैकादशी अथ च परदिने न निःसरति तदा तां विहाय द्वादशीमुपवसेत्। यदा तु सूर्य्योदयात् प्राक्कालीन दशमीविद्धैकादशी परदिने च न निःसरति तदा

२४ ए

तामुपवसेत् । यदा तु तद्विधा सती परदिने पि निःसरति तत्परादिने च द्वादशी तदा तां विहाय खंडामुपोष्य द्वादश्यां पारयेत् यदा तूभयदिने न विद्धैकादशी परदिने च न द्वादशी तदाष्टिदंडा-
त्मिकां विद्धामुपोष्य परदिने द्वादश्याः पादमुत्तीर्य्य पारयेत् विष्णुवत्सत्रापि शुक्लपक्षे परामुपोष्य त्रयोदश्यां पारयेदिति । सर्वासां शुक्लैकादश्यां वैष्णवानां सपुत्राणां गृहस्थानां मुपवासो नि-
त्यः ब्राह्मणस्य विशेषतो नित्यः वैष्णवेतरेषां तु तादृशानां हरिशयनमध्यवर्त्तिनीषु शुक्लैकादशीषूपवासो नित्यः अन्यासु नित्यत्वेन नाधिकारः अपुत्रवतां गृहिणां तु सर्वास्वेव नित्याधिका-
रः । काम्योपवासे त्वविशेषेणैव सर्वेषामधिकारः नित्योपवासेर विसंक्रान्तिदोषो नास्ति । अष्टाब्दादधिकोऽपूर्णाशीतिवत्सरवयस्को नित्याधिकारी विधवानां तु सर्वास्वेव नित्याधिकारः
अत्र मलमासादिदोषो नास्ति । यथा ज्योतिः पराशरः । अनादिदेवतार्चास्तु कालदोषो न विद्यते नित्यास्वभ्यासयोगेन तथैवैकादशीव्रते ॥ ९ ॥ अथ दशमी नियमाः ॥ १० ॥ सूरिसन्तोषे
कांस्यं मांसं मसूरं च चनकं कोरदूषकं । शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियं । तत्रोपवासन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्वापरादिनयोर्ग्रहणं । स्मृतिः शाकं मांसं मसू-
रं च पुनर्भोजनमैथुने । घृतमत्यम्बुपानं च दशम्यां वैष्णवं त्यजेत् । कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणं । व्यायामं च व्यवायं च दिवास्वप्नं च मैथुनं । तिलपिष्टं मसूरं च दशम्यां
परिवर्जयेत् । दशम्यामेकभक्तं च कुर्वीत नियतेन्द्रियः । आचम्य दन्तकाष्ठं च खादेत्तु तदनन्तरं । पूर्वेऽह्नि हरिदिनाच्चोक्ताः सेवध्वं चैकभोजनं । अवनीस्पृष्टशयनाः स्त्रियासंगविवर्जिताः
स्मरध्वं देवदेवेशं पुराणं पुरुषोत्तमं । सकृद्भोजनसंयुक्ता द्वादश्यां च भविष्यथ । सकृद्भोजनमेकभोजनं । मुनिभिर्दिवसस्नं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यं । अह्नि तथा तमस्विन्यां
सार्द्धप्रहरयामान्तरिति छन्दोगपरिशिष्टोक्तभोजनद्वयस्यैककरणं ॥ ० ॥ अथैकादशी नियमाः ॥ प्रातरुत्थाय एकादश्यां बाह्याभ्यन्तरशौचं विदध्यात् । तत्प्रकारस्तु । उपविष्टो जपन्स्नातः

२५

ष्ठतप्रस्खलितादिषु । पूजायानामहस्रस्यसम्नवारान्प्रकीर्त्तयेत् । पाषण्डिनोविकर्म्मस्थानालपेच्चैवनास्तिकान् ।संभाष्यतानशुचिपदं चिन्तयेदच्युतंबुधः । इदंचोदाहरेत्सम्यक्कृत्वातत्प्रगतेमनः । शारीरमन्तःकरणोपजातं वाह्यंचविष्णुर्भगवानशेषं ।शमंनयत्वस्तुममेहशर्म्मयोगादनन्ते हृदिसन्निविष्टे । अन्तःशुद्धिंवहिःशुद्धिंशुद्धोधर्म्ममयोच्युतः । सकरोतुममैतास्मिनशुचिरेवास्मिसर्वदा । वाह्योपघातनिरयानोद्गांश्चभगवानजः । शमंनयत्वनन्तोसौ विष्णुश्चेतसिसंस्थितः । सततसंभाष्यजप्तव्यंपाषंडादीनुपोषितैः । उपोषितैर्नियमस्थितैः । एतेचमंत्राः । शर्मफलकामनारहितेनापिमुमुक्षुणाजप्तव्याः अविशेषेणविधानात् यथायोऽस्तानदेष्टि यंचवयं द्विष्मइतिमंत्रोदेषाभावेपिस्यादितिनिर्णीतं । तथाहिमंत्रस्य शर्म्मसाधनताप्रकाशसामर्थ्यलक्षणालिंगेनैततसाधनकर्म्मणात्साधनतासिद्धिर्विनैवत्यालिंगस्तुनतत्रसाक्षात्प्रमाणं किंत्वेतत्कामइदंकुर्य्यादितिश्रुत्यनुमापकतयैवतत्रचेष्टसाधनतापरेणविधिप्रत्ययेनानेष्टमेवशर्म्मेतदभावनितिप्रतिपादनादनिष्टस्यतस्पकृतोभाव्यत्वं यथास्वर्गादिसाधनस्याप्यग्निहोत्रादेर्मुमुक्षंप्रतिनतज्जनकतेति । ततश्चप्रातःसंकल्पंकुर्य्यात् । तद्विधानं वराहपुराणे । गृहीत्वौडुम्बरंपात्रं वारिपूर्णमुदङ्मुखः । उपवासन्तुगृन्हीयाद्यद्वावार्य्येवधारयेत् । एकादश्यांनिराहारोभूत्वाचैवापरेहनि । भोक्ष्येहंपुंडरीकाक्षशरणंमेभवाच्युतइत्युच्चार्य्यततोविद्वानपुष्पांजलिमथार्पयेदित्युक्ताद्दिमधिकंविष्णुनोक्तं । ततस्तत्पात्रजलंकिंचितपि वेदाचमनवन्नात्रदूषणं । स्कान्देराविंनयेत्ततःपश्चात्प्रातःस्नापीसमाहितः । उपवासंतुसंकल्प्यमंत्रपूतंजलंपिवेत् । मंत्रस्तुकात्यायनोक्तः । अष्टाक्षरेणमंत्रेणत्रिर्जपेनाभिमंत्रितं । उपवासफलंप्रेप्सुपिवेत्पात्रगतंजलं । अष्टाक्षरेणओंनमोनारायणायेतिमंत्रेणततःप्रार्थयेत् । इदंव्रतंमयादेवगृहीतंपुरतस्तव । निर्विघ्नांसिद्धिमाप्नोतुत्वत्प्रसादाज्जनार्द्दन । ततोविष्णुपूजनं । तथाचएकादश्यांमहाभाग

२५ ए

उपवासो विधीयते। नरसिंहं समभ्यर्च्य सर्वपापैः प्रमुच्यते। अत्र चाराधनाय द्वादश्यामित्यनेन समभेकमूलत्वार्थं द्वादश्यां विष्णुपूजनमिति कश्चित् तन्न समभ्यर्च्येति क्त्वाप्रत्ययेनानु
ष्ठेयक्रियान्तरेणासंहृसमानकर्तृकतया बोधयितुमुचितत्वादिति। अभ्यर्च्य उपवासो विधीयते इत्यनेनान्वयात् एकादश्यामेवार्चनं अत एव एकादशीव्रतविषयमेवेदं वाक्यं निबं
धेषु लिखितमिति समयप्रदीपस्मृतिसागरः। तथा च ब्रह्मपुराणे। एकादश्यां शुभे पक्षे निराहारः समाहितः। स्नात्वा सम्यग्विधानेन धौतवासा जितेन्द्रियः। संपूज्य विधिवद्विष्णुं श्रद्ध
या सुसमाहितः। पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः। उपचारैर्बहुविधैर्जपहोमप्रदक्षिणैः। स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यैर्मनोहरैः। दण्डवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः।
संपूज्य विधिवद्रात्रौ कृत्वा चैव प्रजागरं। कथां वा गात्रिकां विष्णोर्गायन् विष्णुपरायणः। याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः। उपचारैर्बहुविधैः षट्त्रिंशदुपचारादिभिः। अथ
विष्णुपूजने विधिः। यमदग्निः। अचिन्त्यस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना। रूपस्थानां देवतानां पुंस्त्र्यंशां दिककल्पना। तत्राधिका
रिणमाह विष्णुपुराणे। वर्णाश्रमाचाररता पुरुषेण परः पुमान्। विष्णुराराध्यते पन्था नान्यस्तत्तोषकारणं। मत्स्यपुराणे। आदित्यं भास्करादिभ्यः छन्दनमिच्छेद्धुताशनात्। ज्ञानं च शं
करादिच्छेन्मुक्तिमिच्छेज्जनार्दनात्। अपि स्यात्स कुले स्माकं सर्वभावेन यो हरिं। प्रपद्येशरणं विष्णुं प्रजेशं मधुसूदनं। आह्निकचिन्तामणौ षट्त्रिंशदुपचारानाह। आसनाभ्यंजनेत
द्वर्त्तनविवक्षणे। सन्मार्जनं सर्पिरादिस्नपनावाहने ततः। पाद्यार्घ्याचमनीयं च स्नानीयमधुपर्कके। पुनराचमनीयं च वस्त्रं यज्ञोपवीतके। अलंकारा गंधपुष्पं धूपदीपौ तथैव च।
तांबूलादिकनैवेद्यं पुष्पमाला तथैव च। अनुलेपनशय्या च चामरव्यजनं तथा। आदर्शदर्शनं चैव नमस्कारो थ नर्त्तनं। गीतवाद्ये च दानानि स्तुतिहोमप्रदक्षिणं। दंतकाष्ठप्रदाने च त

२८

नोदेवविसर्जनं । उपचारा इमे ज्ञेयाः षट्त्रिंशत्सुरपूजने । वाद्यं विशेषयति योगिनीतंत्रे । पूजाकाले सदा विघ्नोडिंडिमेन प्रवादयेत् । देवस्य स्वत्वानुत्पादमते दानं गौणं पूजा दक्षि
णादि तद्धर्मप्राप्त्यर्थं षोडशोपचारादीनाऽ प्रपंचसारे । आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकं । मधुपर्काचमस्नानवसनाभरणानि च । सुगंधिसुमनोधूपदीपनैवेद्यवंदनं ।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश । अर्घ्यपाद्याचमनकमधुपर्काचमान्यपि । गंधाद्यो नैवेद्यान्ता उपचारा दश क्रमात् । गन्धादयो नैवेद्यान्ता पूजा पंचोपचारिका । उपचारैर्यथा
शक्ति देवतामन्वहं यजेत् । ब्रह्मपुराणे ओंकारादिसमायुक्तं नमस्कारान्तकीर्त्तितं । स्वनाम सर्वसत्वानां मंत्र इत्यभिधीयते । अनेनैव विधानेन गंधपुष्पे निवेदयेत् । गंधपुष्पमात्रं पंचो
पचारासंभवे । मंत्रनिर्णये । मंत्रपाशेन देवेशि देवतानीयते ध्रुवं । साधकस्य विना कार्य्यसिद्धिं हत्वा निगच्छति । ब्रह्मपुराणे । देवानां प्रतिमा यत्र घृताभ्यंगक्षमा भवेत् । पलानि तस्यै

२६ ए

देयानि श्रद्धाया पंचविंशतिः । अष्टोत्तरशतं पलं स्नाने देयं च सर्वदा । अत्र पंचकृष्णलको माषस्तेषु वर्णास्तु षोडश । पलं सुवर्णाश्चत्वार इति मनूक्तमष्टरत्तिकाधिकलौकिकमा
षद्वयाधिकतोलकत्रयेण पलं भवति तत्पंचविंशत्या अष्टरत्तिकाधिकलौकिकमाषद्वयाधिकत्र्यशीति तोलका भवन्ति । एवं तथाविधाष्टोत्तरशतपलेन लौकिकषष्ट्याधि
कशतत्रयतोलका भवन्ति । उद्वर्त्तनं विकस्वरोऽग्राह नरसिंहपुराणं । यवगोधूमजैश्चूर्णै रुद्वर्त्त्यैः ष्णेन वारिणा । प्रक्षाल्या देवदेवेशं वारुणं लोकमाप्नुयात् । पादपीठं त्वयो दद्याद्वि
ल्वपत्रैर्निघर्षयेत् । उष्णांवुना च प्रक्षाल्य सर्वपापैः प्रमुच्यते । शारदायां गंधपुष्पाक्षतयवकुशाग्रफलसर्षपैः । सदूर्वैः सर्वदेवानामर्घ्यो मे तदुदीरितं । आह वन्नीत्युपक्रम्य कात्यायनः ।
मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येनेति अपिहितमाच्छादितं । होमसंख्या माह देवीपुराणं । होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत् । अष्टाविंशतिरष्टौ वा यथाशक्ति विधीय

ते। द्रव्यमाह कात्यायनः। आज्यद्रव्यमनादेशे यथाशक्ति विधीयते। नरसिंहपुराणे। दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्ततां। सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः। अष्टांगुलेन
मानेन तत्प्रमाणमिहोच्यते। कालिकापुराणे। यद्दीयते च देवेभ्यो गंधपुष्पादिकं तथा। अर्घ्यपात्रस्थिते तोये रन्निषिच्य तदुत्सृजेत्। शारदायां तत्र तत्र जलं दद्यादुपचारान्तरान्तरे। नरसिंहपुराणे
स्नाने वस्त्रे च नैवेद्ये दद्याच्चाचमनीयकं। भविष्यदेवीपुराणयोः। शुचिः सुवस्त्रधृक् प्राज्ञो मौनी ध्यानपरायणः। गतकामभयद्वन्द्वो रागमात्सर्यवर्जितः। आत्मानं पूजयित्वा च स्रग्गन्धपीत-
वाससा। स्वमूर्त्त्या यजेद्देवान् स्वकीयासनसंस्थितान्। स्वमुहूर्त्ते पूर्वाह्णादिकालेऽपचारमाचमाह स्मृतिः। मृत्कुंभात्ताम्रकुंभे ध्वस्नानं दशगुणं स्मृतं। रौप्ये शतगुणं प्रोक्तं हैमे को-
टिगुणं स्मृतं। एवमर्घ्येषु नैवेद्ये बलिपूजादिषु क्रमात्। पात्रान्तरविशेषेण फलं चैवोत्तरोत्तरं। विभवे सति यो मोहान्न कुर्याद्विधिबोधितं। न तत्फलं समाप्नोति देवद्रोही स उच्यते। भवि-
ष्ये वस्त्रं गुणविहीनं च न पात्रं कारयेत् क्वचित्। स्मृतिः। देवानां दर्शनं पुण्यं दर्शनात्स्पर्शनं वरं। स्पर्शनादर्चनं श्रेष्ठं घृतस्नानमतः परं। अष्टत्वोमं च जपैः सुप्रभूतैः स्तुतांघ्रिभिः।
प्राङ्गंगाजले स्नानं घृतस्नानं समं बुधाः। चित्रदर्शनेऽपि हयशीर्षेण फलमुक्तं। चित्रस्थं पुंडरीकाक्षं सविलासं सविभ्रमं। दृष्ट्वा विमुच्यते पापैर्जन्मकोटिषु संचितैः। एवं प्रतिमायां तपो-
योगादिना सान्निध्यमाह यथा अर्चकस्य तपोयोगादर्चनस्यातिशायनात्। आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति। स्वप्नेऽपि दर्शनं पुण्यं वतामेव तथा च ब्रह्मपुराणे इन्द्रद्युम्नं प्र-
ति भगवद्वाक्यं। मद्दर्शनं मत्पुण्यानां स्वप्नान्तेऽपि न विद्यते। त्वं पुनर्दृढभक्तित्वात् प्रत्यक्षं दृष्टवानसि। संवत्सरप्रदीपे। केशवार्चा गृहे यस्य न तिष्ठति महीपते। तस्यान्नं नैव भोक्तव्यं अभ-
क्ष्येण समन्वितं। अर्चा शालग्रामादिके। नरसिंहपुराणे। तस्मादेकमना भूत्वा यावज्जीवप्रतिज्ञया। पूजनान्नरसिंहस्य सं प्राप्नोत्यभिवांछितं। ब्रह्मपुराणे ये पूजयन्ति तं देवं शंखच

२७

ऋगादाधरं वाङ्मनःकर्म्मभिः सम्यक्कृतेयान्ति परमंपदं। विद्याकरध्दृतं। तर्जनी स्पृष्टं युक्ता हेमयुक्तात्वनामिका। सैवपुत्रात्पदर्भेर्याकाप्यैविप्रेणासर्वदा। विहृष्टः। स्नातः सुप्रक्षालितपाणिपादः
शुचिर्बद्धशिखः दर्भपाणिराचान्तः प्राङ्मुखः उदङ्मुखो वाउपविष्ट ध्यात्वादेवताः पूजयेत्। मत्स्यसूक्ते। ग्रस्ताः समूलाद्दर्भाश्चर्य छिन्तचाधिकं फलं। हारीतः मार्जनार्चनं वलिकर्म्म भोजनानिदेवे
नेतिगब्रचतीर्थेनेतिशेषः। वायुपुराणे॥ दानं प्रतिग्रहो होमो भोजनं वलिरेव च। सांगुष्ठेनसदाकार्य्यमसुरेभ्योऽन्यथा भवेत्। एतान्येवचकर्म्माणि दानादीनि विशेषतः। अन्तर्जानुविशेषेण
तद्वदाचमनं नृप। सांगुष्ठेनेति अंगुलीसंगतांगुष्ठेनकारणोत्यर्थः। अन्तर्जानु जानुनोर्मध्ये यथावा कुर्भवतिन्तथाकार्य्याणीत्यर्थः। अतएवाचमने गोतमः दक्षिणंवाकुंजान्वन्तराकृत्वेति यमः
इष्टं निवेदितं दत्तंभुक्तंजप्तं तपःश्रुतं। यावधानाः प्रलुम्पन्ति शौच भ्रष्टधिजन्मनः। स्मृतिः। त्वमिताः पशवो वन्ध्याः कन्यका च रजस्वला। देवता चसनिर्मा ल्यापान्तिपुरायंपुराकृतं। गोतमः।
रात्रावुदङ्मुखः कुर्य्याद्दैवकार्य्यं सदैवहि। शिवार्चनं सदाप्येवं शुचिः कुर्य्यादुदंमुखः। दानधर्म्मविध्दं प्रति नारदवाक्यं। अयुक्तवादेवकार्य्याणि कुर्वते ये विकत्थनाः सन्तुष्टा श्वक्षमायुक्ताश्च
नमस्याम्यहं विभो। आवकत्थनाः अनात्मश्लाघाकारिणः। स्कन्दपुराणे। सर्ववाद्यमयी घंटा केशवस्य सदाप्रिया। वादनाल्लभते पुरायं यत्त कोटिशतोद्भव। संवत्सरप्रदीपे। पश्यघंटाष्टहेना
स्तिशंखो वापुरतो हरेः। कथं भागवतोनाम्नगीयते तस्यमोहिनः। तथा॥ सर्वदोषाः प्रलीयन्ते घंटानादे कृते हरौ। तथा नदीतडागसंभूतं वापीकूपहृदोद्भवं। गंगोदकं भवेत्सर्वं शंखेनैवसमुद्धृतं
वराहपुराणे। दक्षिणावर्त्त शंखेनपात्रेताडुम्बरे स्थितं। उदकं यः प्रतीच्छेत शिरसा हृष्टमानसः। स प्रजन्मकृतं पापं तत्क्षणादेव नश्यति। ओडुम्बरे ताम्रभवे स्कान्दे। दक्षिणावर्त्त शंखस्यतो
येन योऽर्चयेद्धरिं। सप्तजन्मकृतंपापं तत्क्षणादेव नश्यति। गौतमीयतंत्रे। शालग्रामेमरोयन्त्रे मंडलेप्रतिमासु च। नित्यंपूजा हरेः कार्य्या नतुकेवलभूतले। हरेरित्युपलक्षणं तथाच पद्मपु

२७ ए

राणां। शालग्रामशिलारूपी यत्र तिष्ठति केशवः। तत्र देवासुरा यक्षा भुवनानि चतुर्दश। तत्र ब्रह्माद्यो देवा इति क्वचित्पाठः। पूजाप्रदीपे अनुक्तकल्पे मं चक्रलिखित पद्मदलाष्टकं। षट्
कोणाकर्णिकं तत्र वेदद्वारोपशोभितं। राघवभट्टधृतं। शालग्रामे स्थावरे वा नावाहनविसर्जने। शालग्रामशिलायां यन्नित्यं सन्निहितो हरिः गृहे लिंगद्वयं नार्च्यं गणेशद्वयमेव च। शक्तिद्व
यं तथा शंखं मत्स्यादि दशकोक्षितं। द्वौ शंखौ नार्चयेच्चैव शालग्रामशिलाद्वयं। द्वे चक्रे द्वारकायास्तु तथा सूर्यद्वयं बुधः। एतेषामर्चनान्नित्यं उद्वेगं प्राप्नुयाद्गृही। एकादशस्कन्धेपि। उ
द्वासावाहने नस्तः स्थिरायामुद्धवार्चने। अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयं। विष्ण्वर्चनमुपक्रम्य बौधायनः। प्रतिमास्थाने ष्वश्वग्रावावाहनविसर्जनवर्जमिति। रत्ना
करे स्निग्धा तु श्रीकरी नित्यं रूक्षा दारिद्र्यदायिकाः। ब्रह्मा भोगवती नित्यं स्थूला एकान्तदायदा। कपिला दहते पापं ब्रह्मचर्येण पूजिता। दायदा धनदा। तथा व्याघ्रानना भग्ना विषमा
वक्रचक्रिका। नैकचक्रं न भग्रावं दद्रुणां मुखकालिमं। नृसिंहमूर्त्तिं न श्वक्रे नार्चयेत सदा गृही। स्थापिता न प्रचलते यस्मिन्देशे च संस्थिता। तस्यास्तदासनं विद्धि ततो मूर्त्तिं परीक्ष
येत्। तथा संवत्सरं तु यः कुर्यात्पूजां स्पर्शनदर्शने। विना सांख्येन योगेन मुच्यते नात्र संशयः। भक्त्या यावद्दिवा भक्त्या चक्रं पूजयते नरः। अपि चेत्सदुराचारो मुच्यते नात्र संशयः। लिंगपु
राणां। कामासक्तोपि यो नित्यं भक्तिभावविवर्जितः। शालग्रामशिलां नित्यं योऽर्चयेत सोऽच्युतो भवेत्। तथा। शालग्रामशिला यत्र तत्तीर्थं योजनद्वयं। तत्र दानं च होमश्च सर्वं कोटिगुणं भवेत्।
भक्तिरूपास्य नयानिश्चयाभावः अज्ञशास्त्रार्थे दृढप्रत्ययरूपा अन्यत्र भक्तिरावश्यकी। तथा च भागवत। नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः। प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता।
न दानं न तपो नेज्या न शौचं न व्रतानि च। प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनं। वृत्तं यथा। गुरुपूजाघृणा शौचं सत्यमिन्द्रियनिग्रहः। प्रवर्त्तनं हितानां च तत्सर्वं वृत्तमुच्यते। भक्तिर्नवविधाय

था श्रीभागवते। श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनं। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनं। इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा। तथा कथं विना लोमहर्षं द्रवतां चेतसा वि
ना। विनानन्दाश्रुकलया शुध्येद्भक्त्या विनाशयः। वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च। विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति। वराहपुराणे। संस्मृतः की
र्त्तितो वापि दृष्टः स्पृष्टोपि वा प्रिये। पुनाति भगवद्भक्तश्चण्डालोपि यदृच्छया। एतज्ज्ञात्वा तु विद्वद्भिः पूजनीयो जनार्दनः। वेदोक्तविधिना भद्रे आगमोक्तेन वा सुधीः। सुधीरिति पृथिवीसंबो
धनं। तथा यावत्सर्वेषु भूतेषु मद्भावो नोपपद्यते। तावदेवमुपासीत वाङ्मनःकायकर्मभिः। अथर्वांगिरसे। सर्वपापप्रसक्तोपि ध्यायन्निमिषमच्युतं। पुनस्तपस्वी भवति पंक्तिपावनपाव
नः। गारुडे। यद्दुर्लभं परं प्राप्यं मनसो यन्न गोचरं। तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः। विष्णुपुराणे। ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्। यदाप्नोति तदाप्नोति कलौ संकीर्त्य के
शवं। योगियाज्ञवल्क्यः। ध्यात्वा प्रणवपूर्वन्तु देवतन्तु समाहितः। नमस्कारेण पुष्पाणि विन्यसेत्तु पृथक्पृथक्। आग्नेये। तल्लिङ्गैः पूजयेन्मन्त्रैः सर्वदेवान्समाहितः। ध्यात्वा प्रणवपूर्वन्तु तन्नाम्ना स्व
समाहितः। ध्यात्वा प्रणवपूर्वन्तु तन्नाम्नात्तु समाहितः। नमस्कारेण मन्त्रेण विन्यसेच्च पृथक्पृथक्। मन्त्रं तत्र प्रकाशे मन्त्रमधिष्ठेत्य नामान्ते नमो दद्यात् स्वाहान्ते ठिठमेव च। पूजायामाहुतौ चापि स
र्वत्रायं विधिः शिवे। ठिठः स्वाहा स्तुतिः पत्रत्रयान्विता दूर्वा प्रशस्ता चार्घ्यकर्मणि। कालिकापुराणे। यद्दीयते च देवेभ्यो गन्धपुष्पादिकन्तथा। अर्घ्यपात्रस्थितैस्तोयैरभिषिच्य तदुत्सृजेत्
विष्णुधर्मोत्तरे। चन्दनागुरुकर्पूरमृगमदन्तथैव च। जातीफलं तथा दद्यादनुलेपनकारणात्। अतोऽन्यन्नैव दातव्यं किंचिद्देवानुलेपने। विष्णुधर्माग्निपुराणयोः। सुगन्धैश्च सुरामां-
सी कर्पूरागुरुचन्दनैः। तथान्यैश्च शुभैर्द्रव्यैरर्चयेज्जगतःपतिं। कालिकापुराणे। यद्यपि देव्याद्युपक्रम्य दिङ्नियम उक्तस्तथापि। आकांक्षया अन्यत्राप्यन्वेति। यथा नैवेद्यं दक्षिणे वामे पुरतो

पितृपृष्ठतः। दीपं दक्षिणातो दद्यात् पुरतो पि न वामतः। घृतदीपं दक्षिणे च तैलदीपन्तु वामतः। वामतस्तु तथा धूप मग्रे वा नतु दक्षिणे। निवेदयेत् पुरो भागे गंध पुष्पं च भूषणं। सर्वं स्वदक्षिणे स्थाप्यं वा
मे चार्घ्यं निवेशयेत्। दीपं च तथा स्थापयेत् यथा तच्छायां नाश्रयेत्। विभीतकार्ककारंजस्नुही छायां न चाश्रयेत्। स्तम्वदीपमनुष्याणां मन्येषां प्राणिनां तथा इति प्रयोगसारात्। संवत्सर प्रदीपे पो हि
भागवतो भूत्वा कलौ तुलसि चंदनं। नचार्पयति वै विष्णो न स भागवतो नरैः। आग्नेये चन्दनागुरु कर्पूर कुंकुमो शीर चंदनैः। अनुलिप्तो हरिर्भक्त्या वरान् भोगान् प्रयच्छति। कालेय कं तुरुष्कं च रक्त
चन्दनमेव च। नृणां भवन्ति दत्तानि पुराणानि पुरुषोत्तमे। विष्णुधर्मोत्तरे। अनुलिप्तं जगन्नाथं तालवृन्तेन वीजयेत्। वायुलोकमवाप्नोति पुरुषस्तेन कर्मणा। चामरै वींजये द्यस्तु देवदेवं जनार्दनं।
तिलप्रस्थप्रदानस्य फलं प्राप्नोत्यसंशयः। राघवभट्टधृत। शंखपात्रस्थितं गन्धं मंत्रैर्दद्यात् कनिष्ठया। कनिष्ठांगुष्ठसंयुक्ता गन्धमुद्रा प्रकीर्त्तिता। नारसिंहे। अपर्युषित निश्छिद्रैः प्रोक्षि
तैर्जलवर्जितैः। आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिं। देवीपुराणे। स्वयं पतित पुष्पाणि त्यजे दुपहृतानि च शातातपः। शिवे विवर्जयेत् कुन्द मुन्मत्तं च हरे स्तथा। देवीनामर्कमंदारौ सू
र्यस्य तगरन्तथा। विष्णुधर्मोत्तरे। धर्मार्जितधनक्रीतैर्यः कुर्यात् केशवार्चनं। उद्धरिष्यत्यसन्दिग्धं दश पूर्वान् दशापरान्। पंचविंशत्यथैतांश्च पंचविंशत्यनन्तरान्। नारसिंहे मल्लिका
मालती जाती केतकी शाक चंपकैः। पुन्नाग नागवकुलैः पद्मैरुत्पलजातिभिः। तुलसी करवीरैश्च पालासैर्वान्ति कुञ्जकैः। एतैरन्यैश्च कुसुमैः प्रशस्तैरच्युतं नरः। अर्च्चये दशसुवर्णस्य प्रत्येकं
फलमाप्नुयात्। पुन्नागः पुलाल इति मिथिलायां प्रसिद्धः नागो नागकेशरः। नारदीयसप्तसाहस्त्रे। मालती वकुलाशोक शेफाली वनमल्लिका। आम्रातक तगरा काठमल्लिका मधुपिंडिका।
यूथिकाष्टापदं कुन्दं कदम्बं मधुपिंगलं। पाटला चंपकं हृस्वं लवंग मतिमुक्तकं। केतकं कुरुवकं विल्वं कह्लारं वासकं द्विजाः। पंचविंशति पुष्पाणि लक्ष्मी तुल्य प्रियाणि मे। कुरुवकं रक्तझिंटि

२९

कं। यत्तु स्वरभीनित थान्यानि वर्जयित्वातु केतकीमिति वामनपुराणवाक्यं। तन्नरसिंहावतारे तरावतारविषयं। केतकीपत्रपुष्पं च भृंगराजस्य पत्रकं। तुलसीकृष्णतुलसीत घस्तुष्टिकरी हरे
रितिनरसिंहपुराणात्। वामनपुराणे। पारिभद्रं पाटलां च बकुलं गिरिशालिनी। तिलकं जम्बुवनजं पीतकन्त्वगरन्त्वपि। एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने। गिरिशालिनी अपराजि
ता जम्बुवनजं श्वेतजवाकुसुमं। विष्णुधर्मोत्तरे। रक्ताशोकस्य कुसुमम् अतसीकुसुमन्तथा। अप्रतसीशन:। तथा चम्पकस्य च देयानि तथाभूत चम्पकस्य च। अग्नेयेपद्मान्यम्बुसमुत्था
नि रक्तनीले तथोत्पले। सितोत्पलं च कृष्णस्य दयितानि सदान्टप। तथा पाटला करवीरं च जयाजयन्तिरेत व। कुब्जकस्तगरश्चम्प: कर्णिकार: कुरुंटक:। चम्पश्चम्पककुसुमं। अत्र
विशेषो मत्स्यतंत्रे॥ गोपालेवर्जयेत्भिंटीवक चम्पकवासकमित्यत्र चम्पकं कनकचंपकं। तथा च स्कन्दपुराणे। जवाकुरुंटकं वन्यं वकं कनकचम्पकं। विवर्णोक्रमिसन्दष्टं नदेयं भज

२८ १

ताच्युतं। जवा रक्तजवा कुरुंटकं पीतभिंटिकं। भविष्ये। पद्मानि सितरक्तानि कुमुदान्युत्पलानि च। एषां पर्युषिताशंका कार्य्यापिं च दिनोद्भवत:। तुलस्यगस्त्यबिल्वानां नास्तिपर्युषितात्म
ता। अगस्त्यं वकं। योगिनीतंत्रे। विल्वपत्रं च घ्यंच तमालामलकीदृशं। कल्हारं तुलसी चैव पद्मं च मुनिपुष्पकं। एतत्पर्युषितं नस्यात् यच्चान्यत् कालिकात्मकं। कलिकात्मकं प्रस्फुट
योग्यं। राघवभट्टधृतं कालिकामिस्तथा नित्यं विना चम्पकपंकजै:। शुष्कैर्नपूजयेद्विष्णुं पत्रै: पुष्पै: फलैरपि। विष्णुधर्मोत्तरे। उग्रगन्धीन्यगन्धीनि कुसुमानि नदापयेत्। अन्यापत
नजातानि कंटकीनि तथैव च। रक्तानि यानि धर्मज्ञ चैत्यवृक्षोद्भवानि व। श्मशानजातानि यानि चाकालजानि च। तथा। कुटजं शाल्मलीपुष्पं शिरीषं च जनार्दने निवेदितं भयं रोगं नि:
स्वत्वं च प्रयच्छति। वंकुजीवक पुष्पाणि नक्तान्यपि च दापयेत्। अनुत्तरक्तकुसुमदानाद्दौर्भाग्यमाप्नुयात्। अगस्त्यसंहितायां पवाकेपि तवृक्षेभ्य: पुष्पानानीय योर्चयेत्। अविज्ञाप्य तु

तेषां वै निष्फलं तस्य पूजितं । एतद्द्विजेतरपरं । द्विजस्त्वेवं योधः पुष्पाणि सर्वतः सर्वदा हरेदिति याज्ञवल्क्यात् । देवतार्थेन्तु कुसुमस्तेयं मनुरब्रवीदिति वचनाच्च । गोग्रासाग्न्यर्थे । तृणामेधो
सियज्ञार्थं वीरुद्वनस्पतीनां पुष्पाणि स्ववदाददीत फलानि चापरिवृतानामिति गौतमवचनाच्च विशेषो विज्ञेयः द्विजेतरस्य दण्डोपि । तृणां वा यदि वा काष्ठं पुष्पं वा यदि वा फलं । अप्रयच्छन्
हि गृह्णानो हस्तच्छेदनमर्हतीति स्मृतेः । देवोपविधूतं मस्तकोपरि धृतमधोवस्त्रधृतमन्तर्जलक्षालितं च पुष्पं दुष्टमिति हरिभक्तिनामके ग्रन्थे । अभिवाद्याभिवादककरस्थे च पुष्पे दु
ष्टं प्रोक्षणात् । अत्र भोगत्यागाच्च कर्मार्हमिति केचित् । अतएव तयोरभिवादननिषेधमाह बौधायनः । समित्पाण्युदककुम्भपुष्पान्नहस्तो नाभिवादयेत् यं चाप्येवं युक्तमिति । एवं
युक्तः समिदादियुक्तः । लघुहारीतः । जपयज्ञजलस्थं च समित्पुष्पकुशानलान् । दन्तकाष्ठं च भैक्षं च वहन्तं नाभिवादयेत् । अभिवादयेदित्यपवृत्तौ शंखलिखितौ न पुष्पाक्षतपा
णिर्नाशुचिर्न जपन्न देवपितृकार्यं कुर्वन्निति । अक्षताः यवाः अक्षताश्च यवाः प्रोक्ता भ्रष्टा धाना भवन्ति ते । इति मदनरत्ने धृतात् अतएव नारसिंहः । धनाढ्यावञ्छियः । आप
स्तम्बः । समित्पुष्पकुशाज्याम्बुमृदन्नाक्षतपाणिकं । जपं होमं च कुर्वाणं नाभिवादयेत वै द्विजः । आगमने तु वशिष्ठः जपकाले न भाषेत व्रतहोमादिकेषु च । एतेषु चैवाशक्तस्तु य
द्यागच्छेत् द्विजोत्तमः । अभिवाद्य ततो विप्रं योगक्षेमन्तु कीर्तयेत । अत्र द्विजोत्तम पदं निषादस्थपतिवत् कर्मधारयस्यैव युक्तत्वात् अपतितत्रैवर्णिकपरमिति विद्याकरः । वस्तु
तस्तु विप्रमिति श्रवणात् तन्मात्रपरं । याचितं निष्फलं पुष्पं क्रयक्रीतं च निष्फलमिति वदन्ति । तथा न पुष्पच्छेदनं कुर्याद्देवार्थं वामहस्ततः । न दद्यात्तानि देवेभ्यः संस्थाप्य वामहस्त
तः । हारीतशातातपौ । समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् । शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः । क्रये प्रतिप्रसूते ब्रह्मपुराणं । पुष्पैर्धूपैश्च नैवेद्यैर्वक्रयक्रियाहृतैः

30

वीवक्रयक्रिया ह्युतै विति वीववघा च गाशून्येन विक्रेतुरुपन्यस्त मूल्येन क्रयो वीवक्रयः। तद्रूपाया क्रिया तया ह्युतैः। विष्णुधर्म्मोत्तरे। भृंगराजस्य विल्वस्य वकपुष्पस्य च द्विजाः। ज
म्बाघ्रवीजपूराणां पत्राणि विनिवेदयेत्। तथा पुष्पाणि यदि तेन स्युः प्रशस्तैरपि पल्लवैः। दूर्वांकुरैरपि व्रह्मन्स्तज्ञ्ञावेनार्चयाच्युतं। वामनपुराणे विल्वपत्रं शमीपत्रं रंगराजस्य पत्रकं। त
मालामलकीपत्रं शस्तं केशवपूजने। ज्ञानमालायां। पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखं। पुष्पांजलिविधिं हित्वा यथोत्पन्नं तथार्पणं। तथा। जलजं स्थलजं वापि यथोत्पन्नं तथा
पयेत्। तथा चान्यानि पत्राणि विल्वपत्रमधोमुखं। लघुहारीतः। स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विजाः। देवतास्तन्न गृह्णन्ति भस्मीभवति काष्ठवत्। एतत्तु द्वितीयस्नानाभिप्रा
यमिति रत्नाकरः। व्यक्तं मत्स्यसूक्ते। स्नात्वा मध्याह्नसमये नाछिन्द्यात्कुसुमं नरः। मत्पुष्पाद्यर्चनाद्देवि रौरवे परिपच्यते। स्कांदे। न धात्री सफला यत्र न विष्णोस्तुलसीवनं। तन्म्ले
च्छसदृशं स्थानं यत्र नायान्ति वैष्णवाः। यत्र मात्पपरो मर्त्यो यत्र श्वादशिकान्नरः। तुलसी मालती धात्री तत्र विष्णुः प्रियासह। दूर्वा दहति दुःखानि धात्री हरति पातकं। हरीतकी हरेद्रोगं तु
लसी हरते त्रयं। तुलसीं प्राप्य यो नित्यं न करोति ममार्चनं। न तस्याहं प्रगृह्णामि पूजां द्वादशवार्षिकीं। अत एव गृह्णाति तुलसीं शुष्कामपि पर्य्युषितां हरिः। तथा वर्ज्यं पर्य्युषितं पुष्पं वर्ज्यं पर्यु
षितं पयः। न वर्ज्यं जाह्नवीतोयं न वर्ज्यं तुलसीदलं। तुलसीपत्रमादाय यः करोति ममार्चनं। न पुनर्योनिमाप्नोति मुक्तिभागी भवेद्धि सः। तथा। समंजरिदलैर्युक्तं तुलसीसंभवैः क्षितौ। कुर्वं
ति पूजनं विष्णोस्ते कृतार्थाः कलौ युगे। स्नाने दाने तथा ध्याने प्राशने केशवार्चने। तुलसी दहते पापं कीर्त्तने रोपने कलौ। तुलस्यमृतनामासि सदा त्वं केशवप्रिये केशवार्थं चिनोमि त्वां वरदा
भव शोभने। गारुडे। मातस्तुलसि कल्याणि गोविन्दचरणप्रिये। चिनोमि हरिपूजार्थं मपराधं क्षमस्व मे। नदंगसम्भवैर्देवं पूजयामि यथा हरिं। तथा कुरु परिज्ञांगि कलौमलविलासिनि। मंत्रेणानेन

३. ए

यः कुर्य्याद्गृहीत्वा तुलसीदलं । पूजनं वासुदेवस्य लक्षकोटिफलं लभेत् । राघवभट्टधृतं । सद्भिः पर्य्युषितावापि निर्म्माल्यानैव दुष्यति । तथान्यैनहरे स्तुष्टिस्तुलस्या तुष्यते यथा । गरु
डपुराणे । गवामयुतदानेन यत्फलं लभते खग । तुलसीपत्रकैकेन तत्फलं कार्त्तिके स्मृतं । तुलसीं विना या क्रियते न पूजा स्नानं न तद्यत्तुलसीं विना कृतं । भुक्तं न तद्यत्तुलसी विवर्जितं पी
तं न तद्यत्तुलसी विवर्जितं । अन्यत्रापि तुलसीदलसंमिश्रं तोयं यच्छिरसा वहेत् । सर्वतीर्थाभिषेकस्य तेन प्राप्नं फलं ध्रुवं । वैष्णवामृते व्यासः । जलक्लिन्ना भवेद्यावत्तुलसीमूलमृत्तिका
तावत्प्रीणाति भगवान विश्वात्मा पितृभिः सह । मनः प्रसादजननी सुखसौभाग्यवर्द्धिनी । आधिव्याधिहरे नित्यं तुलसि त्वं नमोस्तु ते । इति नमस्कारः । श्रियः प्रिये श्रियावासे नित्यं श्रीधरस
त्कृते । भक्त्या दत्तं मया देवि गृहाणार्घ्यं नमोस्तु ते । श्रियं देहि यशो देहि कीर्त्तिमायुस्तथा सुखं । बलं पुष्टिं तथा धर्म्मं तुलसि त्वं प्रयच्छ मे । इत्यनेन पूजा विष्णुधर्म्मोत्तरे । पुष्पाभावेपि दे
यानि पत्राणि च जनार्द्दने । पत्राभावे जलं देयं तेन पुण्यमवाप्यते । न रत्नैर्न सुवर्णौघैर्न वित्तेन च भूरिणा । तथा प्रसादमायाति यथा पुष्पैर्जनार्द्दनः । ज्ञानमालायां । नाक्षतै रर्च्चयेद्विष्णुं न तु
लस्या विनायकं । न दूर्वया यजद्दुर्गां नाम्रातकैर्द्दिवाकरं । विष्णुधर्म्मोत्तरे । धूपदः सर्वमाप्नोति धूपदः सर्वमश्नुते । वामनपुराणे । रुहिकाख्या करां दारु सिल्हकं सागुरुं सितं । शंखं जाती
फलं श्रीशे धूपानि स्युः प्रियाणि वै । रुहिकामांसी काणामाहिवाख्य गुग्गुलुः । सितं कर्पूरं । सितेति पाठे सिता शर्करा वा । शंखा नखी श्रीशे विष्णौ कालिकापुराणे । पुष्पं धूपं च गंधं च उपचा
रांस्तथापरान् । घ्रात्वा निवेद्य देवभ्यो नरो नरकमाप्नुयात् । नभूमौ वितरेद्धूपं न्यसनेन घटे तथा । यथा तथा धाःप्रगतं ज्ञात्वा तं विनिवेदयेत् । तथा सर्वं सहा वसुमती सहते न त्विदं द्वयं । अ
कार्य्यपादघातं च दीपतापं तथैव च । तथा । नैव निर्वापयेद्दीपं देवार्थमुपकल्पितं । दीपहर्त्ता भवेदन्धः काणो निर्वापको भवेत् । विष्णुधर्म्मोत्तरे । यावदक्षिनिमेषाणि दीपो देवालये ज्वलेत् ।

३१

तावद्वर्षसहस्राणि स्वर्गलोके महीयते। तथा यः कुर्यात्तेन कर्माणि स्याद्दैत्यैः पूजितेश्वराः। तेन देवदत्तदीपेन विष्णुसंहितायां। नाघृतं तिलतैलं विना किंचिद्दीपार्थे इति दद्यादित्य न्नीयते।
नरसिंहपुराणे। सोचकंपनसंजम्बुं तथान्यम्लवलीफलं। प्राचीनामलकं श्रेष्ठं मधुकोडुम्बरं तथा। यत्नपक्वमपि ग्राह्यं कदलीफलमुत्तमं। प्राचीनामलकं करमर्द्दं। वराहपुराणे। अपर्युषि
तपक्वानि दातव्यानि प्रयत्नतः खंडाज्यादिकृतं पक्वं नैव पर्युषितं भवेत्। ब्रह्मांडपुराणे। तांबूलमुज्वलं दद्याद्यो विप्रेभ्यः समाहितः। शिवाय केशवायाथ नागलोके स पूज्यते। श्रीभाग
वते। यद्यदिष्टतमं लोके यच्चापि प्रियमात्मनः। तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते। मत्स्यं वास्तु देवाय। विष्णुसंहितायां। नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वप्यजामहिषीक्षीरं वर्जयेत् पंचनख
मत्स्यवराहमांसानि चेति नाभक्ष्यमिति यद्वर्णस्य यदभक्ष्यं स्वरूपतो लशुनादि तत्तेन न देयं न तु रात्र्यादौ दध्याद्यपि पंचनख श्वशशातिरिक्तः मार्गमांसं तथा छागं शाशं सम्भव युज्यते। ए

३१ एका

तानि हि प्रियाणि स्युः प्रयोज्यानि वस्तुन्यरे। इति वराहपुराणे भगवद्वाक्यात्। तथा माहिषं चाविकं छागमयाज्ञिकमुदाहृतं। माहिषं वर्जयेन्मत्स्यं क्षीरं दधि तथा घृतं। देवलः। चाण्डालेन शुना
वापि दुष्टं हविरयाज्ञिकं। विडालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत्। अन्यच्च हिरण्योदकस्पृष्टादिति कालिकापुराणे। यस्य यद्दीयते वस्त्रमलंकारादि किंचन। तेषां देवतमुच्चार्य हुत्वा
प्रेक्षणापूजने। उत्सृज्य मूलमंत्रेण प्रतिनाम्ना निवेदयेत् प्रोक्षणादिलक्षणां तु। उत्तानेन तु हस्तेन प्रोक्षणां समुदाहृतं। न्यंचताभ्युक्षणां प्रोक्तं तिरश्चावोक्षणां स्मृतं। विष्णुधर्मोत्तरे। तत्त
द्दैवतमभिधाय गृह्णन्तु सर्वदैवत्यं यदनुक्तं द्विजोत्तमाः। तज्ज्ञेयं विष्णुदैवत्यं सर्वं वा विष्णुदैवतं। गोतमः। अन्नं जानुकरं कृत्वा सकुशं सतिलोदकं। फलात्यनभिसंधाय प्रदद्यात् क्रुद्धयान्वि
तः। योगियाज्ञवल्क्यः। अदुष्टविग्रहो देवो भावग्राह्यो मनोमयः। तस्योंकारः स्मृतो नाम तेनाहूतः प्रसीदति। विष्णुपुराणे। ॐकारो भगवान्विष्णुस्त्रिधामा वचसां पतिः। तदुच्चारणतस्तेतु वि

नाशं यान्ति राक्षसाः । त्रिधा मात्रीरूपकारो कारनकाररूपा त्रिधा मानि उत्पत्तिस्थानानि यस्य । तथा गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः । अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः । नारसिं
हे । सर्ववेदान्तसारार्थिः संसारार्णवतारणः । गतिरष्टाक्षरोन्नृणां सपुनर्भवकांक्षिणां । यस्य यावांस्तु विश्वासस्तस्य सिद्धिस्तु तावती । एतावानिति नैतस्य प्रभावः परिमीयते । तथा । स्कन्दपुराण
रीकमध्यस्थं शंखचक्रगदाधरं । एकाग्रमनसा ध्यात्वा विष्णुं कुर्याज्जपं द्विजः । तथाष्टाक्षरस्य मंत्रस्य ऋषिर्नारायणः स्वयं । छन्दश्च देवी गायत्री परमात्मा च देवता । ओं नमो नारायणायेति मंत्रः
सर्वार्थसाधकः । भक्तानां जपतां तात स्वर्गमोक्षप्रदायकः । जपमानसे चेति गणपाठात् व्यक्तवचने मानसे च जपशब्दार्थे सिद्धिः । देवतां ध्यायन् जपं कुर्यात् इत्यादिना ध्यानसंयोगं । यत्तु मंत्रार्थ
चिन्तनाभ्यास एउक्तो मानसो जप इत्यनेन शब्दार्थयोश्चिन्तनमुक्तं तत्रापि जपशब्द बलात् शब्दचिन्तनं प्रधानमर्थचिन्तनमंगं । तथा च योगियाज्ञवल्क्यः । वाच्यः स ईश्वरः प्रोक्तो वाचकः
प्रणवः स्मृतः । वाचकेपि च विज्ञाते वाच्य एव प्रसीदति । अत एव धारयेन्मनसा मंत्रं जिह्वोष्ठौ न विचालयेत् । अभावे त्वक्षमालायाः कुशग्रन्थ्या च पर्वणा । हारीतः । मंत्रार्थज्ञो जपन् जुह्व
न्तथैवाध्यापनं बुधः । स्वर्गलोकमवाप्नोति नरकं तु विपर्यये । नरकं तु विपर्यय इति निंदा मंत्रार्थज्ञप्रशंसापरा । मनुवचने कवाक्यत्वात् न तु सर्वथा निषेधपरा । अन्यथा वेदार्थोपनिबन्धृत्वा
त् प्राधान्यं हि मनोः स्मृतं । मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते इति बृहस्पत्युक्तविरोधः स्यात् । एवमनुक्रमात् श्रेष्ठमाह अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः । धारिभ्यो ज्ञानिनः
श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः । ग्रन्थिनो ग्रन्थसापेक्षपाठिनः धारिणो ग्रन्थानपेक्षपाठिनः अर्थाज्ञाने पि आवर्त्तनेन हृतकंठस्था इति । ज्ञानिनोऽधीतग्रन्थार्थज्ञाः व्यवसायिनः शास्त्रार्थानुष्ठा
यिनः । एवं वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चापि यत् । अजानतोऽर्थं तत्सर्वं तुषाणां कंडनं यथेति व्यासवचनं । तथा व्याख्येयं । जपविधिमाह पुरश्चरणमंत्रिकायां । कनिष्ठानामिका मध्या चतुर्थे त

३४

र्जनीमता। तिस्रोगुंल्याश्चिपर्वाः स्युर्मध्यमा चैकपर्विका। पर्वद्वयमध्यमायाजपकाले विवर्जयेत्। एवमेवं विजानीयात् दूषितं ब्रह्मणा स्वयं। आरभ्यानामिकामध्यात् प्रदक्षिणाक्रमेणतु। तर्ज्जनीमूलपर्यन्तंजपेद्दशस्तुपर्वसु। अंगुलीनीवियुंजीत किंचित्संकोचयेत्तलं। अंगुलीनां वियोगेतु छिद्रेषुस्रवतेजपः। अंगुल्यग्रेषुयज्जप्तं यज्जप्तं मेरुलंघितं। पर्वसंन्धिषुयज्जप्तं तत्सर्वं निःफलंभवेत्। मंत्रतंत्रप्रकाशे। तत्रांगुलिजपं कुर्वन् सांगुष्ठांगुलिभिर्जपेत। अंगुष्ठेनहतं कर्म्मविनातद्फलंभवेत्। मंत्रकोषे हृदयेहस्तमादाय तिर्य्यक्कृत्वा करांगुलीः। आच्छाद्यवाससा हस्तौदक्षिणेनसदाजपेत्। कस्यान्तरमाह अनुलोमविलोमस्थैर्विन्दुयुक्तात्तकाक्षरैः। क्षमेरुकैः साष्टवर्गैः क्रमहस्तावर्णमालया। प्रत्येकवर्णयुग्मन्त्राजप्ताः स्युः क्षिप्रसिद्धिदाः। तदाह अकारादिलकारान्तं पंचाशन्मणिसूत्रकं। क्षकारं मेरुसंस्थाने लकारादिविलोमतः। वर्णाष्टकविभेदेन शतमष्टोत्तरं भवेत्। वैरिमंत्राअपिरण्या मन्येमंत्राश्च किं पुनः। अकारादिलकारान्ता अनुलोमतालकारादाकारान्तजविलोमता क्षकारस्तु मेरुतयान संख्याघटकः। साष्टवर्गैः अकचटतपयशवर्गयुतैः एकैकांतरितंमंत्रंजपेदेवं फलप्रदं। अन्यत्र च ब्रह्मनाडीगतानादिक्षान्तवर्णानविभाव्यच। प्रतिं विन्दुयुतं कृत्वा श्रेष्ठमंत्रंजपेत्पुनः। अकारादिषु संयोज्य तथा कादिषु चक्रमात्। तथालिपिभवेद्दिव्यमानाद्दिशतसंख्यया। अनयासर्वमंत्राणां जपः सर्वार्थसाधकः। ग्रथिताशक्तिसूत्रेणाशतिमंत्रानन्तरदर्शनात् कुंडलिनीसूत्रत्वेन भावनीया जपसमर्पणमाह। गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतंजपं। सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थिते। मंत्रांश्लोकपठित्वा तु दक्षहस्तेनविन्यसे। मूलाद्यनाद्यन्तोयेनदक्षहस्ते निवेदयेत्। अन्तर्भन्न्य विद्याकरस्थं। सहस्त्रं वाशतं वा पिदशवाराद्दिनं जपेत्। तुर्य्यादिष्वाधिकं तेषामतिजाप्यविधिः स्मृतः। तंत्रान्तरे। विक्षेपाद्यथवास्यात् जपहोमार्च्चनान्तरा। उत्तिष्ठातियथान्यासं षडंगं विन्यसेत्पुनः। पांचरात्रे। अपवित्र करोनग्नः शिरसि प्रावृतोपिवा। प्रलपन्वाजपेद्यावत्तावन्निःफलमुच्यते। विष्णुपुराणे। सर्वदेवेष्वयं तु पुराणे स

३२ ८

वतीर्थेषु यः फलं। तत्सर्वं नवमाप्नोति स्तुत्वा देवं जनार्दनं। स्कान्दे। अहन्यहनि यो मर्त्यो गीताध्यायं तु संपठेत्। द्वात्रिंशदपराधैश्च अहन्यहनि मुच्यते। ते चापराधा वराहपुराणे दर्शिताः। श्रीभागव
ते। नानातंत्रविधानेन कलावपि तथा शृणु। ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं। भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दं। त्यक्त्वा सुदुस्त
जसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यं। मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरुष ते चरणारविन्दं। एवं युगानुरूपाभ्यां भगवान् युगवर्त्तिभिः। मनुजैरिज्यते राजन् श्रे
यसामीश्वरो हरिः। स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत्। शिरो मत्पदयोः कृत्वा बाहुभ्यां च परस्परं। प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् इति श्रीभागवद्वाक्यं। स्मृतिः। न देवं पृष्ठतः कृत्वा
प्रणामं त्वाचरेत्क्वचित्। वरमुत्थाय कर्त्तव्यं न तथा भ्रमणं चरेत्। एतच्छिष्टरीति पश्चात्कृत्वा तु यो देवं भ्रमित्वा प्रणमेन्नरः। तस्यैहिकं फलं नास्ति न परत्र दुरात्मनः। तथा भ्रान्त्या चतुःपार्श्वे श्री
कृष्णं यो नमेन्नरः। साष्टांगप्रणिपातेन तस्य मुक्तिः करे स्थिता। स्कान्दे। अर्घ्यं कृत्वा तु शंखेन यः करोति प्रदक्षिणां। प्रदक्षिणीकृता तेन सप्तद्वीपवसुन्धरा। वामनपुराणे त्रिःप्रदक्षिणां यः कुर्यात्
साष्टांगकप्रणामकं। दशाश्वमेधस्य फलं प्राप्नुयान्नात्र संशयः। नरसिंहपुराणे। उरसा शिरसा दृष्ट्वा वचसा मनसा तथा। पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टांग ईरितः। विष्णुधर्म्मे। जानुभ्यां चैव पा
णिभ्यां शिरसा च विचक्षणाः। कृत्वा प्रणामं देवेशे सर्वान् कामानवाप्नुयात्। स्मृतिः॥ देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदंडिनं। नमस्कारं न कुर्याद्यः स उपोष्य विशुध्यति। ब्रह्मपुराणे। यत्किंचि
त्क्रियते देव मया सुकृतदुष्कृतं। तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहं। इत्यनेन सर्वं समापयेत्। श्रीभागवते। मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन। यत्पूजितं मया देव परिपूर्णं तदस्तु
मे। पूजानंतरं शंखपूजा माहात्म्यं च तंत्रप्रकाशे। पूजयेद्गन्धपुष्पाद्यैः शंखं वै देववद्बुधः। नारसिंहे अतः प्रभृति निर्माल्यं मालं धय महामते। नरसिंहस्य देवस्य तथान्येषां दिवौकसां। भविष्ये। पश्च

33

पूजयते देवान् ब्राह्मणाद्द्रव्यलोभतः। भृत्याभवत शार्दूल सयाति नरकं ध्रुवं। भृत्यावेतनेन देवलः। इष्टं दत्तमधीतं वा तत्सर्वापात्मनातपः। प्रयच्छत्यपरेभ्यश्च धनार्थं धर्म्मविक्रयी। संव
त्सरप्रदीपे। विष्ण्वालयसमीपस्थान् विष्णुसेवासमागतान्। चांडालानपतितानवापि नस्पृष्ट्वा स्नानमाचरेत्। उत्सवे वासुदेवस्य स्नायाद्यो ऽशुचिशंकया। तादृशं पापिनं दृष्ट्वा सवासा जलमा
प्नुयात्॥ ०॥ अथ द्वादशीनियमः॥ ०॥ द्वादश्यामपि विष्णुपूजनमाह। एकादश्यां प्रकुर्वन्ति उपवासमनीषिणः। उपासनाय द्वादश्यां विष्णोर्यद्वदियन्तथा। इति भविष्यपुराणात्। यद्वा द्वाद
श्यां विष्णूपासनाय एकादश्यामुपवासं कुर्वन्ति तथा इयमपि षष्ठी युक्ता सप्तमी उपोष्या सप्तम्यां सूर्य्योपासनाय इत्यर्थः। ब्रह्माण्डपुराणे। कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणं। व्यायामं च
व्यवायं च दिवास्वप्नं तथांजनं। शिलापिष्टमसूरांश्च द्वादशैतानि वैष्णवः। द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते। पुनर्भोजनमध्वानं यानमायासमैथुने। उपवासफलं हन्युर्दिवानिद्रा च
पंचमी। वृद्धशातातपः। उपवासं द्विजः कृत्वा ततो ब्राह्मणभोजनं। कुर्य्यात्तथास्य सगुणा उपवासो हि जायते। सगुणः सांगः। कात्यायनः। मिथ्यावादे दिवास्वप्ने बहुशो जनसेवने। अष्टाक्षरं
तीजप्त्वा शतमष्टोत्तरं शुचिः। तथा द्वादश्यां पारणां कुर्य्याद्वर्जयेत्तामपोदकीं उपादकीं पूतिकाशाकं। कूर्म्मपुराणे। कांस्यं मांसं सुरां क्षौद्रं हिंसां तैलमसत्यतां। द्यूतक्रीडां दिवानिद्रां व्यायामं क्रोधमै
थुनं। द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत्। स्मृतिः। घृतं च सार्षपं तैलं यत्तैलं पुष्पवासितं। अदुष्टं पक्वतैलं च स्नानाभ्यंगेन नित्यशः। इति अभ्यंगे द्वादशीतरपरं। नित्यश इति पर्ववारादावपि
वारे द्रव्यदानेनापि प्रतिप्रसवमाह स्मृतिः। रवौ पुष्पं गुरौ दूर्वां भूमिं भूमिजवासरे। भार्गवे गोमयं दद्यात्तैलदोषोपशान्तये। अभ्यंगं च परान्नं च तैलं निर्माल्यलंघनं। तुलसीचयनं द्यूतं पुनर्भोजनमेव
च। वस्त्रपीडां तथा क्षारं द्वादश्यां वर्जयेद्बुधः। अभ्यंगो येन केनापि तिलतैलेन मार्ष्टिरपि निषिद्धः। आयुर्वेदे मूर्ध्नि दत्तं यदा तैलं भवेत्सर्वांगसंगतं। स्रोतोभिस्तर्पयेद्घाहू अभ्यंगः स उदाहृतः। तै

२३ ए

लमस्तं यदंगेषु न च स्याद्वा कृतपारणं । सामान्यं पृथगभ्यंगो मस्तकादौ प्रकीर्त्तितः । निर्माल्यलं घनमन्यादापि निषिद्धं मत्राधिकदोषपरं व्रतहानिकरं वा स्यादेवमुक्तस्येति मन्दमंगलषष्ठीषु
द्वादश्यां श्राद्धवासरे । वस्त्राणां क्षारसंयोगो दहत्यासप्तमं कुलं इति यमवचनात् । गुर्वन्नं मातुलान्नं श्वशुरान्नं तथैव च । पितृपुत्रस्य चैवान्नं न परान्नमिति स्मृतिः । परान्नं विहरतीति मत्स्यसू-
क्ते । स्वपाके वर्त्तमानो यः परपाकं निषेवते । पित्रोरन्नं मातुलान्नं सोदरान्नं तथैव च । मातामहान्नं पुत्रान्नं पितृव्यान्नं तथैव च । गुरोरन्नं भगिन्यन्नं पौत्रदौहित्रयोरपि । श्वशुरान्नं श्वश्र्वन्नं
प्रपौत्रान्नं यशस्विनि । भागिनेयस्यान्नमपि तस्य पुत्रत्रयस्य यत् । स्वामन्नं नोपरान्नं श्रोत्रियान्नं विशेषतः । भिक्षान्नं श्रोत्रियान्नं च पवित्राणि युगे युगे । निन्द्यान्नं यथा । भ्रातुः श्वशुरयोरन्नं
भागिनीया कनिष्ठिका । तस्या अन्नमपालकान्नं नाश्नीयाद्बुधैः सम । यद्यपि यमेन परपाकेन पुष्टस्य द्विजस्य गृहमेधिनः । इष्टं दत्तं तपोधीतं यस्यान्नं तस्य तद्भवेत् । यस्यान्नेन तु भुक्तेन भार्या
समधिगच्छति । यस्यान्नं तस्य ते पुत्रा अन्नाद्रेतः प्रवर्त्तते । हारीत यमदग्निभ्यां । ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रेष्यतां । वैश्यान्नेन तु शूद्रत्वं शूद्रान्नैर्नरकं व्रजेत् । इति । परान्नं सामान्यतो नि-
षिद्धं तथाप्यधिकदोषकरं व्रतहानिकरं च । वराहपुराणे । अष्टम्यां च चतुर्दश्यां षष्ठ्यां च द्वादशी तथा । अमावस्यां चतुर्थ्यां च मैथुनं यो धिगच्छति । तिर्यग्योनौ समागच्छेत् नमलोकं न गच्छति
मम विष्णो ॥ द्वादशीमधिकृत्य कात्यायनः । प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् । अज्ञानतिमिरान्धस्य व्रतेनानेन केशव । प्रसीदस्सुमुखो नाथ ज्ञानदृष्टिः प्रदो भव । ब्रह्मकुम्भ कृपासिंधु
जगतीनां गतिर्भव । संसारार्णवमग्नानां प्रसीद मधुसूदन । एतदनंतरं पारणान्तु ततः कुर्याद्यथासंभवमागत इति हेमाद्रिणापि पठितं । विप्रान्सं पूज्य भक्तित इति संवत्सरप्रदीपे पाठः । विष्णु-
धर्मोत्तरे । द्वादश्यां प्रथमः पादो हरिवासरसंज्ञकः । तमतिक्रम्य कुर्वीत पारणां विष्णुतत्परः । पारणाकालः स्वल्पापि द्वादशी । ननु त्रयोदश्यां यदा न स्यात् द्वादशी घटिकाद्वयं । उपोष्या दशमी विद्धा-

84

सर्वैरेकादशीं तदा। इति नारदवाक्यात् घटिकाद्वयमेव पारणाकालः। घटिकादशाद्यः यथा ब्रह्मसिद्धान्ते॥ घटीषष्ट्या दिवानिशं अत्र केचित् घटिकाद्वयमिति पारणाकालोपलक्षणं अन्यथा तद
धिकेऽपि द्वादशीनिर्गमे प्रातर्वक्त्रावलोकनविद्धायैकादश्युपोष्या स्यात् न च घटिकात्रयादिष्वपि क्षित्वमस्तीति तत्राप्येतद्वाक्याद्दवशतिवाच्यं। यतः पूर्वसंख्यानाशेनैवोत्तरसंख्योत्पादनात्
अन्यथा पशुना यजेतेत्यत्र एकत्वसंख्याविवक्षायामपि उपात्तपशुवपवविनाशे पश्वन्तरावयवेन सहानुष्ठानं प्रपद्येतस्माद्यथा काकेभ्योऽन्नं रक्ष्यतामित्यनेनोपघातकमात्रमुपलक्ष्यते तेन
श्वादिभ्योऽप्यन्नं रक्ष्यत एव तथा च भट्टपादाः काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि देशितः। उपघातप्रधानत्वान्न श्वादिभ्यो न रक्ष्यते। तथा घटिकाद्वयमित्यनेनापि पारणायोग्यः कालोऽपि लक्ष्यत
इत्याहुः तन्न प्रत्यक्ष एव पूर्वसंख्याप्रत्ययनाशात् उत्तरसंख्याप्रत्ययोत्पत्तिनियमः शाब्दबोधे तु न तथा नियम इति सिद्धान्तः। पशुना यजेतेत्यत्र तु विधेयविशेषणत्वेन एकत्वस्य विवक्षितत्वात् द्वि
त्वव्यवच्छेदः अत्र तु कलाद्वयं त्रयं वापीत्यनयोः स्वल्पायामिति श्रवणाच्च जलेनापि पारणाश्रवणाच्च घटिकाद्वयं न नियमः किन्तूपलक्षणं तथा च नारदीये। एकादश्याः कलाप्येका द्वाद
श्यास्तु कलाद्वयं। द्वादश्यां द्वादशी हन्ति त्रयोदश्यां तु पारणां। कलाद्वयं त्रयं वापि द्वादशी तु यदा भवेत्। पारणे मरणे वापि तिथिस्तात्कालिकी स्मृता॥ तात्कालिकीति न तूपवासादिवत् तिथ्यन्त
रसहायेनापि स्वल्पायामथ राजेन्द्र द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः। श्रीभागवतटीकायां। कलार्द्धां द्वादशीं दृष्ट्वा निशीथादूर्द्ध्वमेव हि। आमध्याह्नात् क्रियाः
सर्वाः कर्तव्याः शंभुशासनात्। निशीथात् महानिशायाः। विशेषतो निशीथेन शुभं कर्म च शम्भिरो। ततो विसर्जयेत् प्राप्तो दानादिषु महानिशामित्यनेन निशीथमहानिशयोरेकत्वश्रुतेः पूर्ववचने
ऽरुणोदयश्रुतेश्च स कालः स्कान्दनारदीययोः। उदयात् प्राक् चतस्रस्तु नाडिका अरुणोदयः। हलायुधधृता स्मृतिरपि। प्रदोषे घटिकायुग्मं प्रभाते घटिकाद्वयं। दिनवत् सर्वकर्माणि कारयेन्न विचारयेत्

२४ २

तचाप्यसामर्थ्ये कात्यायनः। सन्ध्यादिकं भवेन्नित्यं पारणान्तु निमित्ततः। अद्भिस्तु पारयित्वा तु नैत्यिकानि भुजिक्रिया इति देवलः। संकटे विषये प्राप्ते द्वादश्यां पारयेत् कथं। अद्भिस्तु पारणां कृत्वा पुनर्भु
क्ते न दोषकृत्। नक्तं नक्तव्रते एतद् उपलक्षणं संकटे विषयश्च उपक्रमात् न तु भोजनादिवत् परिसंख्येति वक्ष्यते। भुक्त्वा किंचिन्न चाचरेदिति वचनसम्वादार्थं। सन्ध्यादिपक्षेऽपाम भोजनत्वं पावन
पक्षे भोजनत्वं। यथा श्रीभागवते नवमस्कन्धे अम्बरीषोपाख्याने प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तदिति द्वादश्यनिर्णये तु नारदीयं। त्रयोदश्यान्तु शुद्धायां पारणां पृथिवीजलं। शतयज्ञाधिके
वापि नरः प्राप्नोत्यसंशयं। विष्णुधर्मे। असम्भाष्यानसंभाष्य तुलस्याः कलिकादलं। आमलक्याः फलं वापि पारणे प्राश्य शुध्यति। यस्य नाभिस्थितं पत्रं मुखशिरसि कर्णयोः। तुलसीसंभवं
नित्यं तीर्थैस्तस्य मखैश्च किं। युक्तो यदि महापापैः सुकृतं नार्जितं यदि। तथापि गीयते मोक्षस्तुलसीभक्षितापदि। विष्णाकरध्वतानि। यः कश्चिद्वैष्णवो लोके मिथ्याचारोप्यनाश्रमी। पुनाति सकलान्
लोकान् शिरसा तुलसीं वहन्। विष्णोः शिरः परिभ्रष्टां यो नित्यं तुलसीं वहन्। सिध्यन्ति तस्य कार्याणि मनसा चिन्तितान्यपि। धारयन्ति न ये मालां तुलसीकाष्ठसंभवां। नरकान्न निवर्तन्ते दग्धाः कोपाग्निना
हरेः। अरुद्राक्षधरो भूत्वा यद्यत् कर्म च वैदिकं। करोति जपहोमादि तत्सर्वं निःफलं भवेत्। स्कान्दे ध्यानधारणाहीनोपि रुद्राक्षं धारयेत्तु यः। सर्वपापविनिर्मुक्तः स याति परमां गतिं। तथा कृत्वोत्ते
वोपवासन्तु भोक्तव्यं द्वादशीदिने। नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनं ॥ ० ॥ अथ स्वदत्तनैवेद्यभक्षणं ॥ ननु दत्तस्य विनियोज्यत्वात् कथं स्वदत्तनैवेद्यं भुंजीतेति च वचनात् तथा यथा
स्वदत्तेपि तस्मात् क्रयणात् सोपयोगः तथा चाश्वमेधिके पर्वणि युधिष्ठिरं प्रति व्यासवाक्यं। दत्त्वैषां भवता मह्यं तां तेप्रतिददाम्यहं। हिरण्यं दीयतामेभ्यो ब्राह्मणेभ्यो धरास्तु ते। यथा वा मध्यमपिंड
भोजनं पत्न्याः। यथाह मनुः मध्यमं पिण्डं पत्नी प्राश्नाति वाग्यता। शंखलिखितौ। पत्नी वा मध्यमं पिंडमश्नीयाद्दत्तं वस्मातेति। वायुपुराणे। पत्न्यै प्रजार्थं दद्याद्धि मध्यमं मंत्रपूर्वकं। सामगानां मं त्रस्तु। आधत्त

35

पितरो गर्भं कुमारं पुष्करस्रजं। यथेह पुरुषः स्यात्तथा कुरुत सत्तमाः। मत्स्यपुराणे। पत्नीन्तु मध्यमं पिंडमाशये विनयान्वितां। आधत्त पितरो गर्भमत्रः सन्तानवर्द्धिनं। एवमत्रः पौराणिकत्वात्।
सर्वसाधारणं। गोभिलः मध्यमं पिण्डं पत्नी पुत्रकामा प्रश्नीयात् आधत्त पितरो गर्भमिति। योवा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात्। उच्छिष्टं भुक्तावशिष्टपात्रस्थं तद्यो भजते सेवते भक्षयतीति यावत्। स उ
च्छिष्टभाक् यजमानस्य पुत्रपौत्रादिः शेषमन्नमिति निवेदिते इष्टैः सह भुज्यते मित्यनुज्ञानात् तस्योच्छिष्टभाजः पत्नी प्राश्नीयादित्यनुवर्त्तते इति मदनारायणाचरणाः। प्रकृते तु विद्वद्धर्मोत्तरं। पत्र
पुष्पं फलं तोयमन्नपानाद्यमौषधं। अनिवेद्य न भुंजीत यदाहाराय कल्पितं। अनिवेद्य हरे र्भुंजन् सप्तजन्मानि नारकी। स्मृतिः। मत्स्येषु सर्पांस्सरां विष्णोः स्मृतिसेवा तु ईश्वरि स्वभोज्या। स्वभोज्यस्या
र्पणादानं फलमिन्द्रादि दुर्लभं। स्वभोज्यस्य मनूक्ता वैश्वदेवाद्यवशिष्टस्य। यथा अघंस केवलं भुंक्ते यः पचत्यात्मकारणात्। यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते। भुक्तवत्सु च विप्रेषु स्वेषु भृ
त्येषु चैव हि। भुंजीयातां ततः पश्चादवशिष्टं तु दंपती। अत एव स्मृतिः। यस्य चाग्नौ न हूयेत यस्य चाग्रं न दीयते। न तद्भोज्यं द्विजातीनां भुक्त्वा तूपवसेदहः। शंखलिखितौ न तदश्नीयाद्यदन्नं देवपितृम
नुष्यार्थं न करोतीति। अत्र पित्रर्थं नित्यनेन पितृवलिर्नित्यश्राद्धं वशिष्टं प्रतीयते व्यक्तो मार्कण्डेयपुराणे देवतातिथिभृत्येषु भूतेष्वभ्यागतेषु च। अभुक्तवत्सु येऽश्नन्ति तद्वत् पित्राग्निपक्षिषु। दु
ष्टान्नपूयनिर्यासभुजः शुचीमुखास्तु ते। जायन्ते गिरिवर्ष्माणः पश्यैते यादृशा नराः। नरा इत्यत्र कर्तृकर्मणोर्भयप्राप्तौ कर्तृत्वमेव। अपादानसंप्रदानकरणाधारकर्मणां। कर्तुश्चान्योन्यसंदे
हे परमेकं प्रवर्त्तते। इति पाणिनेः संक्षिप्तसारध्वतत्वात्। ततश्च तदन्नं विष्णवे निवेद्यैव भोक्तव्यं। यत्तु पितृशेषन्तु योदद्याद्धरये परमात्मने। रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिनः इति श्री
भागवतोक्तं तत्पितृदत्तप्रतिगृहीतविषयमिति मत्स्यसूक्तं। अनिवेद्य न भोक्तव्यं मत्स्यमांसं च यद्भवेत्। अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितं। अनेनस्वयं भोज्यं मांसं मत्स्यादि विष्णवे

३५ ए

देयमित्युक्तं प्रागुक्तविष्णुवचनेन तु अनेवंविधं निषिद्धमित्यविरोधः अतएवायोध्याकाण्डे श्रीरामवाक्यं। इदमुंश्चमहाराजप्रीतोयदशनावयं। यदन्नः पुरुषान्यूनं तदन्नास्तस्य देवता इति। श्री
भागवते त्वयोपयुक्तस्रग्गन्धःवासोलंकारचर्चिताः। उच्छिष्टभोजिनोदासास्तव मायां जयेमहि। तथा ह्यादिरूपंस्तुरवेनाम नैवेद्यमुदरे हरे। पादोदकं च निर्माल्यं मस्तके यस्य साच्युतः। तस्यैव
च स्कन्धेय पयोव्रते। उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः। अद्यादात्मविशुद्ध्यर्थं सर्वकामसमृद्धये। उद्वास्य विसृज्य तत्र चित्तशुद्ध्यादिफलकथनात् अन्यत्रापि भोजनागतः स्वदत्तनैवे
द्यभस्यसामवगम्यते। अन्यथा व्रतांगत्वे फलानुत्पत्तिः। अष्टमस्कन्धेपि। अत्रं पुष्पादिभिश्चार्चेद्द्वादशाक्षरविद्यया। शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति। नसर्पिःसगुडं दत्वा जुहुयान्मूल
विद्यया। निवेदितं तद्भक्ताय दद्याद्भुंजीत वा स्वयं। यत्तु देवद्विजद्रव्यहन्ताऽप्सु निमग्नोऽघमर्षणं। आवर्त्तयेत् इति सुमन्तुनोक्तं अपि दीपावलोकं मे नोपभुंज्यान्निवेदितं। इति भागवतीयं च तद्देवोप
भुज्यमानद्रव्यपरं। अतएव योगिनीतंत्रे। मणिमुक्तासुवर्णानां देवदत्तानि यानि च। न निर्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च। पट्टशाटी च षण्मासं नैवेद्यं दत्तमात्रतः। मोदकं द्व्यब्दं चैव
यामार्द्धेन महेश्वरि। पट्टसूत्रं त्रिमासं च यज्ञसूत्रं त्वहः स्मृतं। यावद्दुष्टं भवेदन्नं परमान्नं तथैव च। विसर्जनीये तु देवी विसर्जनात्तदीयद्रव्यप्रतिपत्तिव्यवहारः। संवत्सरप्रदीपे ब्रह्मपुराणे॥ अ
म्बरीषमनवं वस्त्रं फलमन्नं रसादिकं। कृत्वा हृल्लोपभोग्यं च सदासेव्यं हि वैष्णवैः। अम्बरीष हरेर्लग्नं नीरं पुष्पं विलेपनं। भक्त्या न दद्याच्छिरसा चंडालादधिको हि सः। तथा। अग्निष्टोमस
हस्रैश्च वाजपेयशतैस्तथा। तुल्यं फलं भवेद्देवि विष्णोर्नैवेद्यभक्षणात्। मत्स्यसूक्ते। एकान्तभक्तो देवस्य भोजनादेमनोरमे। शुचापरेरितं नाम मुच्यते दिनविल्विषात्। स्त्रीशूद्रोक्तं न शृणु
या दभावे विर्जयेत्स्वयं। तत्र मंत्रः। उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकांक्षिणः। येन लीलावराहेण हिरण्याक्षो निपातितः। तथा। पादोदकं च निर्माल्यं नैवेद्यं च विशेषतः। महाप्रसाद इत्युक्त्वा ग्रा

३६

र्वं विष्णोः प्रयत्नतः। पादोदकग्रहणे मंत्रः। कृष्ण कृष्ण महाबाहो भक्तानामार्त्तिनाशक। सर्वपापप्रशमनं पादोदकं प्रयच्छ मे। तद्धारणे मंत्रः अकालमृत्युहरणं सर्वव्याधिविनाशनं। विष्णोः
पादोदकं पीत्वा शिरसा धारयाम्यहं। तत्र मंत्राणामनुष्ठानकरणत्वेन विधानात् पूर्वसिद्धस्यैव करणत्वात् मंत्रान्ते कर्मारंभः। तीर्थकांडकल्पतरौ नारसिंहपुराणे। गंगाप्रयागगयनैमिषपु
ष्करीणि पुण्यानि यानि कुरुजांगलयामुनानि। कालेन तीर्थसलिलानि पुनन्ति पापात् पादोदकं भगवतस्तु पुनाति सद्यः॥ पद्मपुराणे॥ ये पिबन्ति नरा नित्यं शालग्रामशिलोदकं। प्रक्षालयन्त्य
सन्दिग्धं ब्रह्महत्यादिपातकं॥ वशिष्ठसंहितायां। शालग्रामशिलातोयमपीत्वा यस्तु मस्तके। प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते। स्मृतिः निवेद्य प्राशनात्पूर्वं देवपादोदकाहुतिः। हो
तव्या जठरे वह्नौ स्वेन पालितलेन तु। तेन पादोदकेनापो नाशं कृत्वा प्राणाहुतिर्नैवेद्येन कार्या। बह्वृचगृह्यपरिशिष्टे। पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतं। अन्यदेवस्य नैवेद्यं भु
क्त्वा चान्द्रायणं चरेत्। अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलं। शालग्रामशिलास्पर्शात् सर्वं याति पवित्रतां॥ कार्तिकापुराणे। यो यद्देवार्चनरतः स तन्नैवेद्यभक्षकः। केवलं सौरशैवे तु
वैष्णवो नैव भक्षयेत्। समानतन्त्वन्यनैवेद्यं भक्षयेदन्यदैवतः। भविष्ये। निर्माल्यं नोपयोक्तव्यं रुद्रस्य तपनस्य च। उपयुज्य च तन्मोहात् नरके पच्यते ध्रुवं। अत एव पुरश्चरणचन्द्रिकायां सु
मुन्नावर्मिना पुष्पमाघ्राय भक्षयेत्सुधीः निर्माल्यं मस्तके धार्यं सर्वांगे चानुलेपनं। नैवेद्यं चोपयुंजीत दत्वा तद्भक्तिशालिने॥ नन्दिकेश्वरपुराणे तु॥ दत्वा नैवेद्यवस्त्राणि नादधीत क
थंचन। वक्तव्यं शिवमुद्दिश्य तदादानेन तत्फलमिति। शिवदत्ते विशेषः। स्मृतिः ब्रह्मचारिगृहस्थैश्च वनस्थयतिभिः सह। भोक्तव्यं विष्णुनैवेद्यं नात्र कार्या विचारणा। एवं च यद्वृत्त
कारं नैवेद्यं भुक्त्वा कृच्छ्रं यतिश्चरेत् इति वचनं तद्विष्णुनैवेद्येतरपरं। यत्तु भागवते भिहितं अपि दीपावलोकं मे नापयुंज्यान्निवेदितं इति तत्रावज्ञाविषयं। अत एव विष्णुधर्मोत्तरे। सः कुर्या

नैनकर्म्माणि स्यादसौ पुष्पितस्तराः। इति विष्णुदत्तप्रदीपं प्रस्तुतोक्तं। अस्यन व्रतिनां व्रते इति विष्णुवचनादशौचेपि कर्त्तव्यता। अव्रतिना मारब्धव्रतानां वक्ष्यमाणवचनात् एतच्च काम्यपरं नि
त्यानामारब्धानामनारब्धानां माविशेषात्॥ ०॥ अथ जलाशयोत्सर्गः॥ ०॥ तत्र प्रदद्यात्सर्वभूतेभ्यो जलपूर्णं जलाशयमिति मत्स्यपुराणवचनात्। जलाशयस्य सर्वभूतसंप्रदानकत्वेना प्रद्य
ष्वेतनोद्देश्यकत्वादुद्देश्यगतस्वामित्वाजननाद्यागत्वं। तथाच श्राद्धविवेकः। देवतोद्देशेन द्रव्यत्यागो यागः देवतात्वं च वेदमेयत्यागोद्देश्यत्वं उद्देश्यत्वं च। तस्यैदं मित्याशेपज्ञानविष
यत्वं अतएव जलाशयोत्सर्गमुपक्रम्य मत्स्यपुराणे प्राप्नोति यद्योगवलेन भूयः इति यागत्वेनाभिहितं। ततश्च तज्जलं स्वस्वत्वदूरीकरणेन नद्यादिवत् साधारणीकृतं। सामान्यं सर्वभूते
भ्यो मयादत्तमिदं जलं। रमन्तु सर्वभूतानि स्नानपानावगाहनैरिति मंत्रलिंगाउपादानं विना कस्यापि न स्वत्वमिति प्राप्तं ततश्चान्यया गवत्तदुत्तरा प्रतिपत्ते रश्रुतत्वेन साधारणजलस्य प
रिग्रहणमात्रेण गोतमोक्तेन स्वामित्वश्रुतेर्यजमानस्यापि तथात्वेन स्वामित्वात्तत्र स्नानादावदोषइति। यथा गोतमः। स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं ल
ब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरिति परिग्रहोनन्यपूर्वस्य जलतृणकाष्ठादेः स्वीकार इति मिताक्षरा। हन्त्यधिकारे व्यक्तमापस्तम्बः। दायाद्यं शिलं छोचान्यत्यो परिग्रही
तमिति अपरिग्रहीतमिति अपरिगृहीतमन्यास्वीकृतमस्वामिकमिति यावत् निर्विष्टं वेतनलब्धं निर्वेशो भृतिभोगयो रित्यमरत्रिकांडशेषयोः॥ ०॥ अथ रजस्वलासूतकिनो व्रतं॥
पुलस्त्यः। एकादश्यां न भुंजीत नारी दृष्टे रजस्यपि। नारी विधवा। सधवयोनिषेधात्। तथाच विष्णुः। पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्। आयुष्यं हरते पत्युर्नरकं चैव गच्छति। तथा
वह्वकालिकसंकल्पो गृहीतश्च पुराया दि। सूतके मृतके चैव व्रतं तन्नैव दुष्यति। एतेन काम्यव्रतारंभोऽशौचे न कार्यः। सूतके मृतके चैव न त्याज्यं द्वादशी व्रतं। सूतके च नरः स्नात्वेति प्रथमचर

णापाठे वराहपुराणे। अशौचमुपक्रम्य विहृतः। नव्रतिनां व्रते अत्र व्रतिनामारब्धव्रतानां तेनारम्भे अशौचेन कार्य्यः। अतो व्रताङ्गदेवपूजाद्यनुष्ठानमप्यविरुद्धं भविष्योत्तरपद्मपुराणयोः। एकाद
श्यां न भुंजीत पक्षयोरुभयोरपि। सूतके मृतके वापि अन्याग्निर्न वाप्यशौचके। सर्वथा न परित्यज्या इच्छतो श्रेयमात्मनः। एकादशीमुपक्रम्य वराहपुराणे। तस्मात्प्रमादे दुःखे वा सूतके मृतकेपि
वा। स्नात्वा काम्यव्रतं कुर्य्याद्दानादिकविवर्जितः स्त्रियास्तु व्रतमध्ये रजोयोगे पूजादि कर्म्म अन्यद्वाराकर्त्तव्यमिति यथा मत्स्यपुराणे। गर्भिणी सूतिका नक्तं कुमारी च रजस्वला। यदाशुद्धा तदा
न्येन कारयेत्क्रियते सदा। इत्यत्रानुक्ततृतीयया स्त्रियास्तु व्रतमध्ये रजोयोगे पूजादिकर्म्म अन्यद्वारा दर्शनादेकच निर्णीतिः इति न्यायादिति वर्द्धमानोपाध्यायाः। कायिकं च स्वयमेव कुर्वीत
उपवासाचरणे गर्भादिपातसम्भावनायां नक्तं भोजनं कुर्य्यात्। उपवासेष्वशक्तस्य तदेव फलमिच्छत। अनभ्यासेन योगानां किमिष्टं फलमुच्यतां। इति नारदप्रश्नानन्तरं उपवासेष्वशक्ता
नां नक्तं भोजनमिष्यते इति मत्स्यपुराणे एवमीश्वर प्रतिवचनात्। स्वयमशुद्धा शुद्धद्वारा पूजादिकं कारयेत्। कायिकमुपवासादि सदाशुद्धा शुद्धकाले स्वयं कुर्य्यात्। स्मृतिपरिभाषाया
मप्येवं॥ ०॥ अथोपवासानुकल्पः॥ मनुः विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः। आपत्सु मरणाद्भीतैर्विधेः प्रतिनिधिः कृतः। एवं प्रथमकल्पस्य योनुकल्पेन वर्त्तते। न सा
म्परायिकं तस्य दुर्मतेर्विद्यते फलं। अत्रापत्कल्पप्रतिनिधयस्तु कल्पानां पर्य्यायता। एकादशीमधिकृत्य स्मृतिः। उपवासासमर्थस्तु किंचिद्भक्ष्यं प्रकल्पयेत्। एकभक्तेन नक्तेन भक्ष्येन ... तु
रः क्षिपेत्। नारदीये अनुकल्पोत्तमं प्रोक्तः क्षीणानां वरवर्णिनि। मूलं फलं पयस्तोयमुपभोग्यं भवेच्छुभं। न त्वेवं भोजनं कैश्चिदेकादश्यां प्रकीर्त्तितं। एवमनुकल्पातिरिक्तं व्रतस्यैव वर्त्तः।
उपवासासमर्थश्चेदेकं विप्रं च भोजयेत्। तावद्धनानि वा दद्याद्यद्भक्ताद्द्विगुणं भवेत्। सहस्रसम्मितां देवीं जपेद्वा प्राणसंयमान। कुर्य्याद्द्वादशसंख्याकान यथाशक्तिव्रते नरः। देवीं गायत्रीं ।

वायुपुराणे उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेत्। न दुष्यत्युपवासेन उपवासफलं लभेत्। भक्ष्यप्रकारमाह नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरं यथाम्बु चाज्यं। यत्पंचगव्यं यदि वाथ वायुः
प्रशस्तमत्रोत्तरमुत्तरं च। उपवासनिषेधे तु असामर्थ्यादपीति तत्रापि हविष्यादिरनुकल्पः। अत्र सर्वत्र तुलसीं भक्षयेत्। तुलसीं विना या क्रियते न पूजा स्नानं न तद्यः तुलसीं विना कृतं। भुक्तं न
तद्यत्तुलसी विवर्जितं पीतं न तद्यत्तुलसी विवर्जितं। इति गारुडपुराणात्। अनुकल्पेपि द्वादश्यां विष्णुपूजनं पारणं च कर्त्तव्यं। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन नैवा
द्वादशिको भवेदिति वचनात्॥ ० ॥ अथोऽव्यवस्था। अत्रैकभक्तादीनामुपवासकार्य्यविधानात् सोमधर्माणां फलं च मासप्राप्तिरिव तु हेतुप्रयोगः कार्य्यः अतएकभक्तादावपि पूर्वापर
दिनयोरेकभक्तादिको धर्म्मः कार्य्यः। यद्वा द्वादशीव्रतं खल्वत्र भगवतो वासुदेवस्यार्चनं जपहोमादिकं प्रधानकर्म्म उपवासादिकं तु अंगं कर्तृसंस्कारकं लिंगात् अंगभूतोपवासप्र
काशकमंत्रानक्तादिपक्षे निवर्त्तते व्रीहिमंत्रवद्यवे अतोस्य प्रयोग इति जीमूतवाहनस्तन्न ऊहं प्रकृत्यन प्रकृतार्पूर्वत्वात् इति कात्यायनसूत्रात् प्रकृतावूहाऽयोगात् विकृतावेवोह इति
अपूर्वीत्प्रेक्षणामूह इति तद्व्याख्यानात् अन्नत एकभक्तादीनां प्रकृतावुक्तावान्नोह इति यदप्युक्तं अंगत्वान्मंत्रवाध इति तदपि नयुक्तं। एको द्विष्टे पार्वणविकृतावावाहनाद्यंगमंत्रस्यैवोहदर्श
नात्। अतएवस्यैकभक्तेन यो मर्त्त्य उपवासव्रतं चरेदिति उपोष्य नक्तेन विभो इत्यादिस्कन्दपुराणादि वचनात्। एकभक्तादिषूपवासपदप्रयोगेन तद्धर्म्मातिदेशान्मंत्रपाठ इति परिशेषरव
णोह्माद्रियायुक्तं। तथा च जैमिनीयं। उक्तं क्रियाभिधानं तच्छ्रुतौ विधिप्रवेशः स्यादिति। क्रिया अग्निहोत्रादि तस्याभिधानं नाम अग्निहोत्रपदस्तु तं उतप्रेक्षाधिकरणे तस्य नाम
श्रवणे विधिप्रदेशः स्यात् विधेयधर्म्मातिदेशः स्यादिति सूत्रार्थः यावज्जीवककर्त्तृकसायंप्रातर्होमे यावज्जीवमग्निहोत्रं जुहोति यदग्नये च प्रजापतये च सायंप्रातर्जुहोतीत्यादिभिः सपरिकराभिहि

३९

तत्वेन शक्तस्याग्निहोत्रशब्दस्य उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोतीत्यनेन उपसदाख्ययागानन्तरं क्रियमाणमाससाध्ये कौण्डपायिनामयनाख्ययागेऽप्यग्निहोत्रपदप्रयोगमात्रात् त
द्धर्मातिदेशः मुखवचं द्रपदवत् व्रीहिभिर्मंत्रस्य तु यवे बाधो नांगत्वात् किन्तु प्रकृतावेव व्रीहिभिर्यजेत यवैर्यजेतेति विकल्पेन श्रवणात् प्रकृतिविकृतिभावाभावान्नोहः । अतोऽसमेतार्थत्वा
द्बाधः । नच चत्वफडादिवन्मंत्रस्य दृष्टार्थतास्तु कथमसमवेतार्थत्वाद्बाध इति वाच्यं यस्य सर्वथा दृष्टार्थकत्वासंभवस्तस्यैव तथात्वकल्पनात् । तथाच जैमिनिः । अर्थाभिधानसामर्थ्यान्मंत्रेषु
शेषभावः स्यात् । तस्मादुत्पत्तिसंबन्धोऽर्थेन नित्यसंयोगात् गौणप्रत्यायनेपि । अस्यार्थः । यतोऽर्थाभिधानसामर्थ्यात् मंत्राणां शेषभावोऽङ्गभावस्तस्मादुत्पत्तिसम्बन्धः । उत्पत्तिसंयोगः उत्प
त्तिकेन मुख्येनार्थेन संयोगः स्यात् कुतो नित्यसंयोगात् तेनैवाव्यभिचारतया संयोगात् गौणप्रत्यायनेपि । यतो मुख्यं प्रत्याय्यैव गौणं प्रत्याययति मुख्यप्रत्यायनेन तु गौणप्रत्यायनमपेक्षते
अतो मुख्येनास्याव्यभिचरितः संयोगः । तथाच गौणेऽसदपि सामर्थ्यं न प्रमाणान्तरादिना । आविर्भवति मुख्ये तु शब्दादेवाविराक्षिप्तं तत् । तात्पर्यं च ततो मुख्ये गौणे चाधिपरता पुनः । प्रमाणान्त
रविजया तदभावान्न तत् स्मृतमिति । तथा यस्य दृष्टं न लभ्येत तस्यादृष्टप्रकल्पनं । लभ्यतेऽर्थस्मृतिर्दृष्टा मंत्रोच्चारणात्त्विह अर्थस्मृतिं प्रयोगार्था प्रयोगाच्च फलोच्चयः । इति दृष्टार्थसम्पत्तौ
नादृष्टमिह कल्प्यते । अतो यस्य क्वचित् द्रव्यदेवतादिप्रकाशकं । रूपदृष्टार्थतासंभवस्तस्य तदसंभवे वैकल्पितेऽर्थे बाध एव । अत एव विद्याकरः शास्त्रावधारणवेलायां हि यत्र प्रयोजनाभावा
दिनिश्चयस्तत्रैव तदुपादानादिलोपः शास्त्रार्थः यथा कृष्णलेऽवघातादिलोपः यत्र तु अनुष्ठानवेलायामेव पुरुषदोषेण प्रयोजनाभावो ज्ञायते तदा प्राकृतनिश्चयाच्छास्त्रप्रापितः पदार्थो निय
मापूर्वमात्रार्थमनुष्ठेय एव अत एव प्रकृतावप्यालस्यादिना व्रीह्यादिस्थाने तंडुलादिषु गृहीतेषु अवघातादि समाचरन्ति याज्ञिकाः पठन्ति च । घातेन्यूने तथाच्छिन्ने साम्नाय्येमान्तिके तथा । यस्ते

३८ ए

मंत्राः प्रयोक्तव्या मंत्राय स्वार्थसाधकाः। मांत्रिके चन्द्रसाध्येऽव घातादौ न्यूनेतत्काले मंत्रपीठाभावेपि यज्ञकाले मंत्राः प्रयोक्तव्याः। अप्रास्मिंस्तु मंत्रार्थज्ञानस्य नास्त्युपयोगः इत्थमेव संप्रति प्रयो
गानुष्ठानमित्याह एवं चोपवासविधौ प्रकृतावेवाशक्त विषयत्वेनातुल्यबलानां विकल्पायोगात् एकमन्त्रादीनां प्रतिनिधित्वमेन तदाह प्रतिनिधौ यथाश्रुत मंत्रपाठः। समवेतार्थता तु गौण्यालक्ष
णया वा। तथा च प्रथमाध्याये कात्यायनसूत्रं शब्दे चाविप्रतिपत्तिरिति प्रतिनिहिते द्रव्ये श्रुतशब्दः प्रयोज्यः श्रुतद्रव्यवुद्ध्या प्रतिनिध्युपादानात् शब्दान्तरप्रयोगे द्रव्यान्तरवुद्धिप्रसंगात्। यथा ग्रस्यमा
नेतु विप्रस्य प्राणाविव जलं पिवेति मत्स्यपुराणादर्शनात् हस्तजलयोर्गौकरणपक्षेपि अग्नेनोकरिष्ये इत्यनूहेनैव प्रयोगः। अत एव यज्ञपार्श्वः तैलं प्रति निधिं कुर्य्याद्यज्ञार्थे याज्ञिको यदि। प्रकृतेर्
वतदा होता ब्रूयाद्घृतवतीमिति इदमुपलक्षणं सर्वप्रतिनिधावेव नोहो न वाधः। नरं पंचत्वमागतं इति वराहपुराणीये तु ननारीं पंचत्वमागतामिति लिंगोहः। स्त्रीपुंदाहस्य समविधानेन
प्रकृति विकृतित्वाभावात् न चवैभक्तिकपुंस्त्वविशिष्टवोधात् स्त्रियां वाध इति वाच्यं प्राथमिकत्वाद्बलीयस प्रातिपदिकस्यार्थवत्वेन स्त्रीपक्षेपि विनियोगात् किंतु वैभक्तिकलिंगस्या स्त्रियां प्रयोग
साधुतामात्रं पुंसिद्धार्थ साधुतापि अत एव एकपाशकेदक्षे पशावाम्नानस्य अदितिः पाशान् प्रमुमोक्तु इति मंत्रस्य निःसन्दिग्धार्थ पाश प्रातिपदिक लिंगेन विनियोगो न तु पश्वाम्नानं विना व
हुवचनेन वहुपाशिकायां विकृतिवृत्कर्षः। नापि प्रकृतावेव पाशपदे ह् व यव लक्षणा किन्तु प्रयोगसाधुतैव बहुवचनेस्यान्युक्तं। एवं च एतद्वः पितरो वास इति जल्पन् पृथक् पृथगिति।
ब्रह्मपुराणेन प्रकृतावेव पार्वणे पित्रादिषु प्रत्येकं एतद्व इति वहुवचनान्त प्रयोगात् तत्रानर्थकत्वात् विकृतावेकोद्दिष्टेपि वहुवचनान्त प्रयोगो न त्वेकवचनं चानूहे तैकोद्दिष्टे इति विह्
वचनादेकवचनान्तोहः। एतद्वचनस्य ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिश्रुतं स्वधास्थ तर्पयत मे पितॄनित्यादि मंत्रान् वहुवचनान्तान् प्रकृतौ समवेतार्थान् एकोद्दिष्टे एकवचन

४० श्री

वदूहेत पितरमित्यादिविकृतान कुर्य्यात्। एकस्मिन पितरि वहुवचनस्यासमवेतार्थत्वात्। अतएव दक्षे। पशौ अदितिः पाशं प्रमुमोक्तु अदितिः पाशान प्रमुमोक्त्विति पाशच्छेदनमंत्रे।
एकवचनान्तवहुवचनान्त श्रुतौ। अदितिः खंडनरहिता देवमातेति श्रीभाष्यव्याख्यानात् स्वधितिरिति पाठः काल्पनिकः अत्र एकवचनान्तस्य प्रकृतौ समवेतार्थत्वात् द्विपाशिकायां विकृ
तौ द्विवचनोहः कार्य्यः वहुवचनान्तस्य तु प्रकृतावसमवेतार्थकत्वाद्विकृतावपि तथैव युक्तत्वान्नोहः। किन्तु वहुवचनान्तस्यैव प्रयोग इत्युक्तं। यत्तु केचिन्निर्णये एतच्च इति वाक्यं पृथक् पृ
थगिति वीप्सावलेन पार्वणमात्रविषयकं एतेन तन्मंत्रस्य वहुवचनस्य पार्वण एव प्रयोगसाधुता न त्वेकोद्दिष्टेपि वीप्सासहितवाक्यप्रवृत्तेरिति तन्न तद्वाक्यप्रवृत्तौ कथं तन्मंत्रलाभः
विकृतिवद्विकृतिरिति न्यायात् लाभ इति चेत्तदा द्विपाशिकायां वहुवचनाद्यूह एव स्यात् पितृपदस्य तु प्रकृतौ समवेतार्थत्वात् प्रेतैकोद्दिष्टे तत्र प्रेतपदोहः इति प्रोक्षणादृगां भक्षां कु
न्तशो यं फलचमसं ददाति इत्यादौ मंत्रे तरस्मिन् प्रोक्षितपदेन प्रोक्षणादिलक्षणौ वहिर्भक्षार्थान्वयव्युत्पत्तेः। मंत्रे तु व्युत्पत्तिमात्रेणार्थपरतो किन्तु प्रातिपदिकलिंगैकविनियोगः। सम्भू
यकारिता तु पाशानिति मोचनकर्म्मतापरत्वेनापि। अतएवोक्तं न विभक्तेर्वचनमवैक्य प्रयोजनमिति अतएव वहुपाशिकायां प्रकृतावपि नोत्कर्षः तथा च भट्टवार्त्तिकं। प्रकृत्यर्थस्य
पाशस्य विभक्त्यर्थस्य कर्म्मणः। उभयोः प्रकृतौ भावान्नोत्कर्षो स्याद्वक्ष्यतइति अस्मात्त्वमभिजातोसीति साग्नेर्मंत्रस्य तु स्त्रियां वाधः पाशवे धर्म्यात् तथाहि अस्मादितीदमः सर्वना
मत्वे सन्निहितार्थपरत्वात् एतद्वाक्यरूपान्तरासन्निधानात् स्वपदोपात्तलिंगसंख्याविशिष्टैव व्यक्तिरित्यर्थः प्राणानिकइति यावत्। ततश्च प्रातिपदिकलिंगादेव पुंसादौ मंत्रविनि-
योग इति पाशानिति नरं पंचत्वमागतमित्यादेत्वसर्वनामत्वान्न सन्निध्यपेक्षा किन्तु लिंगसंख्यानपेक्षस्यैव प्रातिपदिकार्थता। नचैवं तदेनं संशयापन्नमिति याज्ञवल्क्यीयमंत्रस्य स्त्री

४ · ५

परीक्षायां वाधः स्यात् एतन्मित्यस्य सर्वनामत्वेन अस्मात्त्वमितिवत् सन्निहितविप्रमनुपनीत पुंस्त्व विशिष्टव्यक्तिपरत्वेन पाशवैधर्म्यादिति वाच्यं । एतन्मित्यस्य मानुषः शुद्धिमिच्छ
तीति स्ववाक्यस्थ मानुषत्वेन स्त्रियं अपि सन्निधेस्तातपरत्वात् । नतु पश्वाज्ञाविपुंस्त्वविशिष्टार्थता अतो मानुषत्वेन स्त्रिया अपि सन्निधेस्तस्यामपि प्रवृत्तस्य प्रातिपदिकार्थस्य न वि
भक्त्यासंकोचः पाशन्यायतो स्यात् एतेन एकभक्तस्य एकभक्तेन नयो मर्त्ये उपवास व्रतं चरेदिति । उपोष्य नक्तेन विभोइत्यादिषूपवासपदप्रयोगान्मासमात्रमग्निहोत्रं जुहोतीति वन्न
मातिदेशात् प्राप्तस्योहितप्रयोगइति तथा सम्भवे तादर्थ्य एकाहारादिपदं प्रयोज्यमिति हेमाद्रिणोक्तमपि निरस्तं ॥ ० ॥ अथैकभक्तं ॥ स्कान्दे दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत्
एकभक्तमिति प्रोक्तं रात्रौ तत्र कदाचन । नियमेन ब्रह्मचर्यं तथा शौचं नित्यमामिष वर्जनमित्यादि सामान्य व्रत धर्मेण । चतुर्थ चरणो तु न्यूनं ग्रास त्रयेण त्विति देवलः । द्वात्रिंशच्चतुर
हस्यस्य इति पद्मपुराणोक्तस्य ग्रासस्य ग्रासत्रयन्यूनतेति अत्र च परदिना र्द्धातीतकाले तत्तिथ्यलाभेपि परदिनएव तत्समये एकभक्तं कुर्यादि तिथौ यत्रोपवासः स्यादेकभक्तो
पि सा तिथिरिति सुमन्तुवचनेनोपवासइति रवं डविशेषसम्बन्धि दिनएव प्रतिनिधितयैकभक्त विधानात् स्वतंत्रैकभक्तएव दिनार्द्धसमयातीतकाले तत्तिथिकालनियमः एवं नक्ता
दिष्वपि ॥ ० ॥ अथ नक्तव्रतं । प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः । उदयात् तु तदा पूज्या हविर्नक्तव्रते तिथि । भविष्य देवीपुराणयोः । हविष्यभोजनं स्नानं सत्यमाहारलाघवं
अग्निकार्यमधः शय्यां नक्तभोजी षडाचरेत् । एवं नक्तव्रतस्य गुरुत्वेन प्रागुक्तवायुपुराणे नक्तमिति हविष्यान्नादिभोजनस्य कालपरं न तु नक्तव्रतपरं तथात्वेऽनरो नर गुरुव्रतोपदेश
प्रस्तावे तदनन्तरं केवलं हविष्यान्नोपदेशानुपपत्तेः ॥ अथ हविष्यान्नं । हैमन्तिकं सिता स्विन्नं धान्यामुद्गास्तिला यवाः । कलायकंगुनीवारा वास्तूकं हिलमोचिका । षष्टिका कालशाक

च मूलकं केमुकतरत्। लवणे सैन्धवसामुद्रे गव्ये च दधि सर्पिषी। पयो नष्टसारं च पनसाम्र हरीतकी। तिन्तिडी जीवकं चैव नागरंग पिप्पली। कदली लवली धात्री फलान्यगुडमैक्षवं
अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते। अत्रास्विन्नधान्यमित्यभिधानादन्यत्र स्विन्नधान्येन दोषः। तएव हारीतः। अथ सूनां व्याख्यास्यामो जंगमस्थावरादीन् प्राणिनः सूदयन्तीति सू
नाः ताः पंचविधा भवन्तीत्युपक्रम्य चतुर्थीपर्यन्तामभिधाय आदीपनतापनस्वेदनभर्जनपचनादिभिः पंचमी। तदेवं पंचतानिरयपोनीः अहरहः प्रजाः कुर्वन्ति पंचभिः पाकयज्ञैर्गृह
स्थेवाणप्रस्थं पावयन्तीति एषामर्थः कल्पतरुकृताकृतः। सूदयन्ति प्राणैर्वियोजयन्ति आदीपनं काष्ठानां तापनं तोयादेः स्वेदनं धान्यादेः भर्जनं यवादेः पचनं तंडुलादेः पंचसूनाः
पाकयज्ञैः सूनादोषात् पावयन्तीत्यर्थः। तेन धान्यस्वेदनं गृहस्थवाणप्रस्थाभ्यां कर्त्तव्यमिति प्रतीयते किन्तु तत्र धान्यस्यांकुरजननयोग्यतानाशादेव पापं भवतीति। तत्रनापि पं
चसूनाविवरणे चुल्ल्युक्तं धान्यादौ स्वेदनविधानात् कृताकृतपाकशुद्धिविवेचने धिः स्विन्नतादिदोषश्रवणात् कृते तद्धिकृतं कात्यायनेन कृतमोदनशक्त्वादि तंडुलादि कृताकृतं। व्रीह्या
दि चाकृतं प्रोक्तमिति हव्यं त्रिधा मतं। अतो लाजमोदकादि यथातथापक्वमपि श्राद्धादौ दीयते। अग्रास्त्यसंहितायां। दधिक्षीरं घृतं गव्यं ऐक्षवं गुडवर्जितं। नारिकेलफलं चैव कद
लीलवलीं तथा। आम्रमामलकं चैव पनसं च हरीतकीं। व्रतान्तरप्रशस्तं च हविष्यं मन्वते बुधाः। अत्रैव हविष्ये यवामुख्यास्तदनु व्रीहयः स्तदसाभे माषकोद्रवचनकगौरसर्षप
मसूरचीनककुलस्थवर्जमन्यदन्नं। अत्र हविष्येषु यवामुख्यास्तदनु व्रीहयः स्मृताः। हैमन्तिकं सिताखिन्नमित्यादि वचनानुसारेणैव भोजनादौ व्यवहारः। माषकोद्रवगौरादीन्स
र्वालाभेपि वर्जयेदिति कात्यायनवचनं तु होमप्रकरणान्तत्रैव नारायणोपाध्यायेनाप्येतद्वचनं। अथ हविष्यान्नस्याग्नौ जुहुयादिति गोभिलोक्तं हव्यं स्पष्टयतीति व्याख्यातं। एतेन कार्त्ति

केसकलं मासं नित्यस्वाध्यायी जितेन्द्रियः। हविष्यभुग्जपन् शान्तः सर्वपापैः प्रमुच्यते इति विष्णुवचनं। हविष्यभुग्यवागूर्वा इत्यादिवचनबोधितमिति केचित्तदुक्तं निरस्तं एवं च व्रीहयो मुष्टिमात्राः
स्पृष्टाश्च गुणाय वा। अपि इति शारदातिलकोक्तं यत्तद्विशेष्य यत्र होमे मात्रा विहिता तत्र परिमितया परमिति। स्नानस्य वैदिककर्माङ्गत्वे सामान्यव्रतधर्मत्वे सिद्धे नक्तव्रते पुनरुपादानं तदर्थं न प्राद
रातिशयार्थं अशक्त्या सामान्यधर्मव्युदासेनापि नक्तव्रतसिद्ध्यर्थं वा नक्तभोजनकालस्तु भविष्यपुराणे नक्षत्रदर्शनान्नक्तं केचिदिच्छन्ति मानवाः। मुहूर्त्तोनं दिनं केचित् प्रवदन्ति मनीषिणः।
नक्षत्रदर्शनान्नक्तमहं मन्ये नराधिप। स्मृतिः। नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरं। सदिवाकरं तु यत्प्रोक्तं भान्ति केचिद् घटिकाद्वये। निशानक्त
न्तु विज्ञेयं यामार्द्धप्रहरेऽसदा। सौरनक्तकालस्तु तिथितत्त्वेऽनुसन्धेयः। भविष्यपुराणे। उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचितं। अयाचितात् परं नक्तमिति प्रोक्तं मनीषिभिरिति। वचन
स्यैवमर्थः। प्रधानमुपवासस्तत्रासामर्थ्ये नक्तं तदशक्तौ अयाचितं तदशक्तौ भैक्ष्यं एषामनुकल्पक्लेशानां उत्तरोत्तरवृद्धिसम्भवात्। मार्कण्डेयः। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन
दानेन न निर्द्वादशिको भवेत्। अत्र विष्णुपूजापारणयोरङ्गान्तरापेक्षया प्राधान्यमेकाम्यते। अनुकल्पिकेऽपि तयोरावश्यकत्वात्॥ ० ॥ अथ पुत्रादिप्रतिनिधिः॥ ०। स्कन्दपुराणे। पुत्रं वा
विनयोपेतं भगिनीं भ्रातरं तथा। एषामभाव एवान्यं ब्राह्मणं विनियोजयेत्। गरुडपुराणे। भार्या भर्तृव्रतं कुर्यात् भार्यायाश्च पतिस्तथा। असामर्थ्ये द्वयोस्ताभ्यां व्रतभङ्गो न जायते। वराहपुरा
णे। पितृमातृपतिभ्रातृस्वस्त्रार्यादि भूभुजां। उद्दिश्यार्थमुपोषित्वा स्वयं च फलभाग्भवेत्। कात्यायनः। दक्षिणा नात्र कर्त्तव्याङ्गभूता विहिता च सा। न च प्रतिनिधौ ममेह शर्मेत्यादिमन्त्र
स्य फलं। कुत्रान्वेतीति चेत् प्रधान एव तथा च शारीरकभाष्ये श्रुतिः। यां वै कांचन यज्ञे ऋत्विज आशिषमाशासते यजमानायैव तामाशासते इति होवाचेति ब्राह्मणास्सर्वे स्वयजमानायेत्यत्र

४२

यजमानस्यैवेति पाठे विशेषः। सत्त्वायां सूत्रं यां नैकां चन त्वृत्विगाशिष मासास्ते सा यजमानस्यैवेति ऋत्विग्यजमानपदे प्रतिनिधिप्रधानपरे आकांक्षितत्वात् अतएव प्रतिनिधिपत्न्यादिना। अ
यान्तु नः पितर इत्यादिरनूह एव पठ्यते वाक्यस्य काल्पनिकत्वात् तच्चन तथेति कालमाधवीये। काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः। काम्येषूपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः। नि
त्यं नैमित्तिकं च प्रतिनिधिनाप्युपक्रम्य कारयेत् काम्ये तु स्वसामर्थ्यं। परीक्ष्य स्वयमेवोपक्रम्य कुर्यात्। असामर्थ्ये उपक्रमादूर्ध्वं प्रतिनिधिना कारयेत्। एतच्च काम्यश्रौतपरं काम्यस्मार्त्तेन्त्व
न्यद्वाराप्युपक्रम्य कार्य्यं। तथाच पराशरभाष्ये। शातातपः। श्रौतं कर्म्म स्वयं कुर्य्यादन्योपि स्मार्त्तमाचरेत्। अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः। अन्ततः उपक्रमात् परतः। अन्य
थानित्ये नैमित्तिकमात्रपरत्वे श्रौतस्मार्त्तभेदेनापादानं व्यर्थं स्यात् तयोरविशेषादेव प्रतिनिधिलाभात् अतएव भारतपाठे हीनथा समाचारः स्मृत्यर्थसारे नाभावस्य प्रतिनिधिरभावा
न्तरमिष्यते। सजातीयमप्यभावान्तरमभावस्य प्रतिनिधिर्नेष्यते। भावस्तु कदाचित् यथोपवासादौ ब्राह्मणभोजनादीति। नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् श्रोत्रियाणामभोज्यं
यत् द्रव्यं हितदशेषतः ग्राह्यं प्रतिनिधित्वेन होमकार्य्ये न कुत्रचित्। द्रव्यं वै कल्पिकं किंचिद्यच्च संकल्पितं भवेत्। तदभावे सदृग् ग्राह्यं न तु वैकल्पिकान्तरं। उपात्ते तु प्रतिनिधौ मु
ख्यार्थो लभ्यते यदि। तत्र मुख्यमनादृत्य गौणेनैव समापयेत्। संस्काराणामयोग्योपि मुख्यस्य वहि गृह्यते। न तु संस्कारयोग्यान्यो गृह्यते प्रतिरूपकः। मुख्ये कार्य्यासमर्थे तु लब्धेप्येत
दनादरः। प्रतिरूपकमादाय शक्तिमेवोपयुज्यते। कार्प्परूपैस्तथा पर्णैः क्षीरैः पुष्पैः फलैस्तथा। गंधै रसैः सदृग् ग्राह्यं पूर्वलाभे परं परं। ग्राम्याणामनुभवे ग्राम्यमारण्यानामन्वरण्यतो। य
वाभावे तु गोधूमास्ततो व्रीहयवादयः। हविष्य गोघृतं ग्राह्यं तदभावे तु माहिषं। आजं वा तदलाभे तु साक्षात्तैलं प्रयुज्यते। तैलाभावे ग्रहीतव्यं तैलजं तिलसंभवं। तैलदृष्ट्या तिलपिष्टादि तद

लाभेतु सन्नहं कौसुंभं सर्षपोद्भवं। वृक्षस्नेहोथवा ग्राह्यं पूर्वाभावे परः परः। तदलाभे गवादीनां क्रमात्क्षीरं विधीयते। तदलाभे दधि ग्राह्यममभावे तिलइष्यते। यत्र मुख्यं दधिक्षीरं तत्रापि
तदलाभतः। अजादेः क्षीरदध्यादि तदलाभे तु गोघृतं। मुख्यसेनोथवा ग्राह्यः कार्य्यकारणासन्ततो। अतएव अभावे पूर्वं दधि ततः पयः। तथा सर्वत्र गौणकालसु कर्म्म चोदित
माचरेत्। प्रायश्चित्तं व्याहृतिभिर्हुत्वा कर्म्म समाचरेत्। मत्स्यसूक्ते। घृतं न लभ्यते यत्र शुक्लक्षीरेण होमयेत्। क्षीरस्य च दधिज्ञेयं मधुनस्तु गुडो भवेत्। आयुर्वेदे। मधु यत्र न विद्येत
तत्र जीर्णगुडो भवेत्। पैठीनसिः। कांडपुष्पफलपर्णाफलप्रवालरुवसगंधादीनां सादृश्येन प्रतिनिधिं कुर्य्यात्। सर्वलाभे यवः प्रतिनिधिर्भवतीति। कांडं नालं प्रवालो हि अंकुरः। सर्वालाभे य
वइति कल्पतरुः। अवय वइति नारायणोपाध्यायाः। शान्तिदीपिकायां नारदपंचरात्रे अभावे चैव धातूनां हरितालं प्रशस्यते। बीजानामप्यलाभे तु यवस्का विधीयते। ओषधी
नामलाभे तु सहदेवा प्रशस्यते। रत्नानामप्यलाभे तु मुक्ताफलमनुत्तमं। लोहानामप्यलाभे तु हेममात्रं प्रकल्पयेत्। लोहानां तैजसमात्राणां। न्यायप्राप्तप्रतिनिधिमधिकृत्य
जैमिनिः। न देवताग्निशब्दक्रियमिति। अस्यार्थः देवताया आहवनीयादेर्मन्त्रस्य प्रयाजाद्यदृष्टार्थककर्म्मणश्च अदृष्टमात्रार्थकत्वेन आरादुपकारकत्वान्न प्रतिनिधिः। व्रीह्यादी
नान्तु सन्निपत्योपकरणानां पुरोडाशसाधनं दृष्टमेव प्रयोजनमिति तत्र प्रतिनिधिरुचित इत्युक्तं परिशिष्टं मुख्यकाले हि मुख्यं चेत साधनं नैव लभ्यते। तत्कालद्रव्ययोः कस्य न
गौणतामुख्यतापि वा। तत्र भरद्वाजः। मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधनं। न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणं। गौणेष्वतेष्वकालेषु कर्म्म चोदितमाचरेत्। प्राय
श्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्। उत्तरमतं सिद्धान्त इति केचित्। तदभिप्रायसाधकं मीमांसा षष्ठाध्याये सूत्रं। पौर्वापर्य्ये पूर्वदौर्बल्यं प्रकृतिवदिति। ज्योतिष्टोमे न्योन्यं संवो

43

ध्ययज्ञशालातोवहिर्निर्गतानृत्विजां विच्छेदनिमित्तं प्रायश्चित्तं श्रूयते यद्युद्गाता विच्छिन्द्यात् किंचिद्दक्षिणेन यजेत यदि प्रतिहर्त्ता सर्वस्वदक्षिणेनेति तच्चोद्गातृप्रतिहर्त्रोः क्रमेणावि
च्छेदे विरुद्धप्रायश्चित्तयोः समुच्चयासंभवात् किं पूर्वं कार्य्यमुतापरमिति संशये हि ग्रनुजातविरोधित्वात् पूर्वमिति पूर्वपक्षे राद्धान्तः। पौर्वापौर्य्ये सति निमित्तयोः पूर्वस्यैव नैमित्तिक
स्य दौर्वल्यं उत्तरस्य निरपेक्षस्य तद्बाधकतयोदितत्वात् पूर्वोदयकाले उत्तरस्याप्राप्तत्वेन पूर्वेण बाध्यत्वायोगात्। उक्तं हि पूर्वं परसजातत्वादबाधित्वैव जायते परस्यानन्यथोत्पाद
उक्तबाधेन सम्भवइति। प्रकृतिवदिति तथा हि प्रकृतौ क्रत्वोपकाराः। कुशाः प्रथममतिदेशेन किं कृतावुपकारका कांक्षिणीं प्राप्ताः कस्योपकारकतया चरमभाविभिरपि शब्दै
र्निरपेक्षैर्वध्यन्ते तद्वदिति अतएव शारीरकभाष्यटीकायां वाचस्पतिमिश्राः ज्येष्ठत्वं चानपेक्षितस्य बाध्यत्वे हेतुर्न बाधकत्वे रजतज्ञानस्य ज्यायसः शुक्तिकाज्ञानेन कनीयसा
बाधदर्शनात् तदनपराधेन तदपराधात्मनस्तस्योत्पत्तेरनुपपत्तेः। तथा च पूर्वापरबलीयस्त्वं तत्र नाम प्रतीयतां। अतोऽन्यनिरपेक्षाणां यत्र धेयोंऽभवेदिति। यदि च पूर्ववचनस्य
पूर्वपक्षत्वे वैयर्थ्यं स्यादुभयवचनार्थौ विवक्षणीयौ तदा विषयभेदेन व्यवस्थेयौ। तथा हि यच्चाष्टकाश्राद्धादौ कालान्तराभावस्तत्र तत्कालानुरोधेन विहितद्रव्यानाभावेपि
प्रतिनिहितद्रव्यमादाय मुख्यकाल एव तत्कारणं नत्ववचनानुपपत्तेः स्वेच्छाकस्य गौणकालप्रतीक्षणां तथा च छान्दोग्यपरिशिष्टं। स्थालीपाकं पशुस्थाने कुर्य्याद्यद्यानुकल्पितं। अ
पयेत्तं सवत्साया स्तरुणयागोः पयस्यनुइत्यादि। यत्र प्रत्याब्दिकश्राद्धादौ हृद्यैकादश्यादिगौणकालोऽस्ति तत्र मृताहादावन्नाद्यभावे तदनुरोधेन उपवासादिरूपं प्रायश्चित्तं कृत्वा तत्
कर्त्तव्यं। तथा च लघुहारीतः। एकोद्दिष्टं तु कर्त्तव्यं पाकेनैव सदा स्वयं। अभावे पाकपात्राणां तदहः समुपोषणं। तथा छन्दोगपरिशिष्टं। संस्कारा अतिपत्येरन् स्वकालाच्चेत् कथंचन।

४२ एका

हुत्वैतदेव कुर्वीतयेनूपनयनादधः। यत्रतु विनिगमकवचनाभावस्तत्र यद्यपि क्रियायाः प्राधान्यात् कालाद्वव्यं द्वयमपि गुणभूतमेव तथापि उभयोपिसंस्कारसामर्थ्ये द्रव्यादयः कालस्य
सूर्य्यादि क्रियाघटितस्य कर्त्रधीनत्वासिद्धेरसन्निधिकत्वान्निमित्तमात्रेणावहिरंगत्वात् कालस्यानिमित्तत्वं व्यक्तं भविष्येग्रतः कालं प्रवक्ष्यामि निमित्तं कर्मणामिह। द्रव्यस्यतुयागस्वरू
प निर्वाहकत्वेनाभ्यर्हितत्वात् कर्म्मणः करकत्वेनान्तवत्वाच्च। पुत्रादिप्रतिनिध्यभावेतु ब्रह्मवैवर्त्तः उपवासेसमर्थश्चेदोदकं विप्रन्तु भोजयेत्। तावद्धनानिवादद्याद्यद्भक्त्याद्विगुणंभ
वेत्। सहस्रसम्मितांदेवींजपेद्वाप्राणसंयमान्। कुर्य्याद्द्वादशसंख्याकान् यथाशक्ति व्रतेनरः देवींगायत्रीं। काश्यपपंचरात्रेमरुद्धयनेमदुत्थाने मत्पार्श्वपरिवर्त्तने। अत्रयोदीक्षितः-
काद्विद्वैद्यतवोभक्तितत्परः। निर्निमित्तमदीक्षायांनचक्षुद्व्याधिपीडितः। अन्नंवायदिभुंजीतमूलंफलमथापिवा। अपराधमहंतस्यनक्षमामितुकाश्यपक्षिपामिनरकेघोरेकल्पस्थं
मम्रजायते। निमित्तं प्रारब्धचांद्रायणादिव्रतविशेषइतिदीक्षायांचरुशेषप्राशनस्यविहिततत्वाददीक्षायामित्युक्तं क्षुद्व्याधिनावापीडितः सर्वमेततप्रदर्शनमात्रं शक्तौनिर्विरोधइत्य
र्थः अन्नादिकमप्युपलक्षणमितिजीमूतवाहनः। अचनिमित्तं प्रारब्धचान्द्रायणादीति यदुक्तंतन्नचांद्रायणादौ भोजनस्यावश्यकत्वाभावात् किन्तु निमित्तं रविवाराद्युपवासपार
णांजलपानरूपं दीक्षायामपि चरुप्राशनं घ्राणरूपं अन्यथापुरोडाशोपि देव वैसंप्राप्ते हरिवासरे। अभक्ष्येणासमः प्रोक्तः किंपुनश्वासनक्रियेति नारदीयं विरुध्येत घ्राणस्यचोभ
यारूपतामाहकालादर्शे श्रुतिः। पिब्यमाघ्रेयंतन्नैवप्राशितंनैवाप्राशितंचभवतीति। पिव्यमुपलक्षणंग्राकांक्षाया विशिष्टत्वात्तेनैकादश्यो तदुभयचजलपारणांचरुघ्राणं विधायोप
वासः कार्य्यः॥ ०॥ अथपारणानियमः॥ यद्यप्यत्र चांद्रायणादिवत् परिसंख्यासंभवस्तथापि पावतीरकर्म्मसमाप्ताविभ्यस्मात् ज्ञातोरुत्पन्नः पारणाशब्दोयद्यपिसमाप्तिमात्रमभिधातुं-

५५

समर्थस्तथापि उपवाससमापकभोजनएव लोकशास्त्रयोः प्रयोगात् पंकजादिशब्दवत् प्रयोगाधीनयौगिकत्वात्तस्मादुपवासव्रतस्य चरमांगं भोजनमभिधात पारणाशब्दः तथाच देवलः। उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत्। अन्यथा तु फलस्यार्द्धं धर्ममेवोपसर्पति। धर्मोऽयमः। किंचिदपि पारणांगं नस्यात्तदा प्रतिनिधिविधानं नोपपद्येत तदा ह्येवं सकृदेव संकटे विघ्ने प्राप्ते द्वादश्यां पारयेत् कथं। अद्भिस्तु पारणं कुर्यात् पुनर्भक्तं न दोषकृत् पारणं तु भवेत् कथमिति वर्षकृत्ये पाठः। नक्तं त्रयोदशी नक्तं भोजनव्रतमिति तिथ्यग्रपक्षराणां शितानशिनत्वेन श्रुतावभिधानात् तदुभयव्रतसिद्धिः। यथा आपो वै सर्वरसा अम्भसा प्राशनेनाशितो भवत्यनाशितश्च भवतीति। एवं च जलस्यापि नरसत्वे भोजनाङ्गत्वाद्यते। नित्यक्रियानिवर्त्तते सहनेनैमित्तिकैः सदेति। कालिकापुराणीयं रागप्राप्तपरं। अतएवादित्यपुराणे॥ पारणान्तं व्रतं ज्ञेयं व्रतान्ते द्विजभोजनं। असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतान्तरं। इत्थं च उपवासव्रते पारणानियमाज्जलेन पारणं विधाय तद्दिने उपवासादिः कार्य्यः॥ ०॥ अथ भैमी॥ विष्णुधर्मोत्तरे। मार्गशीर्षे शशधरे माघे मासि प्रजापते। एकादश्यां शितेपक्षे सोपवासो जितेन्द्रियः। द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते। तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः। तिलभुक् तिलवापी च षट्तिली नावसीदति। सकृत्तु षट्तिली भूत्वा सर्वपापैः प्रमुच्यते। मत्स्यपुराणे। यद्यष्टम्यां चतुर्द्दश्यां द्वादश्यामथ भारत। अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुं। ततः पुण्यामिमां भीमतिथिं पापप्रणाशिनी। उपोष्य विधिनानेन गच्छ विष्णोः परं पदं। भीमतिथिं भैमीत्वेन ख्यातमेकादशीं। अथ पार्वतीमहोत्सवाद्युत्तरैकादश्युपवासः। कल्पतरौ ब्रह्मपुराणे। आश्विनशुक्लपक्षमधिकृत्य उपवासश्च कर्त्तव्य एकादश्यां प्रजागरं। द्वादश्यां वासुदेवश्च पूजितव्यश्च सर्वदा॥ अथ शयनादिकालः भविष्यनारदीययोः। मैत्राद्यपादे स्वपिती हि विष्णुर्वैष्णव्यमध्ये परिवर्त्तते च। पौष्णावसाने च सुरारिहन्ता प्रबुध्यते मासचतुष्टयेन। मैत्रमनुराधा वैष्णव्यं-

४४ ९

श्रवणापौष्णं रवतो॥भविष्ये। निशिस्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनं। अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत्। एवं च नक्षत्रपादयोग प्राप्तौ फलातिशयः। तद्विधानं वामनपुराणे। एका
दश्यां जगत्स्वामि शयनं परिकल्पयेत्। शेषाहि भोगे पर्य्यंकं कृत्वा संपूज्य केशवं। अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः। लब्ध्वा पीतांबरं देवं निद्रां समानयेत्। अनुज्ञां लब्ध्वा इत्य
न्वयः एकादशी समये दिवा शयनीय परिकल्पनं रात्रौ द्वादशी क्षणे निद्रा इति विष्णुधर्म्मोत्तरे। आस्तीर्णा शयनं दत्वा प्रीणाये च्छेषशायिनं आषाढ शुक्लद्वादश्यां विष्णुलोके महीयते ।
आस्तीर्णा शयनं शोभनाहरणा पुत्रं खट्वादि। वराहपुराणे श्रीभगवानुवाच॥ अन्यत्तु संप्रवक्ष्यामि कर्मसंसारमोक्षणं। कदंब कुटजश्चैव धनकोऽर्जुनकस्तथा एभिरभ्यर्च्चनं कुर्य्यात् विधिदृष्टे
न कर्म्मणा। ततः संस्थापनं कृत्वा मम मंत्रविधिः स्मृतः। नमो नारायणायेत्यु क्त्वा इमं मंत्रमुदीरयेत्। पश्यन्तु मेघानपि मेघश्यामं त्वुपागतं सिच्यमानां महीमिमां। निद्रां भगवान् गृह्णा
तु लोकनाथ वर्षास्विमं पश्यतु मेघवृन्दं। ज्ञात्वा च पश्यैव च देवनाथ मासांश्चतुरो वैकुण्ठस्वपतु पश्य तु देवनाथ। आषाढ शुक्लद्वादश्यां सर्वशान्तिकरं शिवं। य एतेन विधानेन भूमिमे
कर्म्मकारयेत्। स पुमान्न प्रणश्येत संसारे षु युगे युगे। शयने कुटज विधाना विष्णुधर्म्मोत्तरीय निषेधोऽन्यत्र धनकः कपित्थः संस्थापने समापनं। भूमीति पृथिव्याः संबोधनं। एवं सु
प्तेन मंत्रेण कृष्णं स्वापयेत्ततः। सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदं। विबुद्धे त्वयि बुध्येत जगत्सर्वं चराचरं इति मंत्रेण पूजयेत्। प्राप्ते भाद्रपदे मासि एकादश्यां शितेऽहनि। कटदा
नं भवेद्विष्णोर्महापूजा प्रवर्त्तते। कटदानं पार्श्वपरिवर्त्तनं। कामरूपीय निबंधे। एवं संपूज्य विधिवत् भाद्रस्य द्वादशी दिने। मंत्रेणानेन देवेशं पार्श्वेन परिवर्त्तयेत्। ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वा
दशी तव। पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि केशव। त्वयि सुप्ते जगन्नाथे जगत्सुप्तं भवेदिदं। विबुद्धे त्वयि बुध्येत जगदेतच्चराचरं। ब्रह्मपुराणे। एकादश्यां तु शुक्लायां कार्त्तिके मासि केशवं। प्रसुप्तं

45

बोधयद्रात्रौ श्रद्धाभक्तिसमन्वितः। रात्रौ स्तुत्वं बोधनन्तु दिवैव। वाराहे। कौमुदस्य तु मासस्य यासिता द्वादशी भवेत्। अर्चयेद्यस्तु मां तत्र तस्य पुण्यफलं शृणु। यावल्लोका विवर्त्तन्ते यावत्त्वं चैव माधवि। मद्भक्तो जायते तावदन्यभक्तो न जायते। कौमुदस्य कार्त्तिकस्य माधवीति पृथिव्याः सम्बोधनं। कृत्वैवं मम कर्म्माणि द्वादश्यां मत्परो नरः। ममैव बोधनार्थाय इमं मन्त्रमुदीरयेत्। महेन्द्ररुद्रैरभिनूयमानो भवानृषिर्वन्दितवन्दनीयः प्राप्तैवेयं किल कौमुदाख्या जागृष्व जागृष्व च लोकनाथ। मेघागता निर्म्मलपूर्णचन्द्रः शारद्यपुष्पाणि च लोकनाथ। अहं ददानीति च पुण्यहेतोर्जागृष्व जागृष्व च लोकनाथ। एवं कर्म्माणि कुर्वीरन्द्वादश्यां ये यशस्विनि। मम भक्ता नरश्रेष्ठास्ते यान्ति परमां गतिं। अत्र मन्त्रद्वयपाठानन्तरं उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते। त्वया चोत्थीयमानेन उत्थितं भुवनत्रयं। इति सम्प्रदायागतस्तृतीयः श्लोक इति वाचस्पतिमिश्राः। शयनोत्थानमन्त्रास्तु कल्पतरुप्रभृतिसंग्रहसंवादाल्लिखिताः। तदेवमेकादश्यां वा रेवत्यन्तपादयोगवशाद्द्विवोत्थानं नक्षत्रयोगाभावे तु द्वादश्यामेव कारयेदिति गुरुचरणाः। जीमूतवाहनस्तु आभाकाशितपक्षेषु मैत्रश्रवणरेवतीः आदिमध्यावसानेषु प्रस्वापावर्त्तरोधनं। आभाकाशितपक्षेषु आषाढभाद्रकार्त्तिकशुक्लपक्षेषु एषां च द्वादश्याः प्राप्तौ मुख्यकल्पः। विष्णुधर्म्मोत्तरे विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते। द्वादश्यामृक्षसंयोगे पादयोगो न कारणं। अप्राप्तेद्वादशीमृक्षे उत्थानशयने हरेः। पादयोगेन कर्त्तव्ये नाहारात्रे विचिन्तयेत्। वचनान्तरं। रेवत्यन्तो यदा रात्रौ द्वादश्यां च समाप्नुतः। तदा प्रबुध्यते विष्णुर्दिनान्ते प्राप्य रेवती। दिनान्ते त्रिधा विभक्तदिनतृतीयभागे दिवोत्थानुमित्यनुरोधात् रात्रौ विरोधो विनिहन्ति पारान् स्वप्नो दिवा राष्ट्रकुलं च भर्तुः। सन्ध्याद्वये स्वल्पफला धरित्री भवेन्नराणामपि रोगदुःखं। वराहपुराणे द्वादश्यां सन्धिसमये नक्षत्राणामसंभवे आभाकासितपक्षेषु शयनावर्त्तनादिकं। तदेवं शयनादौ कालचतुष्टयं। द्वादश्यां निशादौ नक्षत्रयोगः। तदभावे निशाद्यनादरेण तिथ्यन्तरेपि पादयोगः तस्याप्यभावे द्वादश्यां सन्ध्यायां

४५ ख

नक्षत्रमात्रेण तस्याप्यभावे द्वादश्यामेव सन्ध्यायामिति विष्णुधर्मोत्तरे । किन्त्वैत्राद्यपादे न द्वादश्यंशेन योदिवापौष्ण्यपादेन किन्त्वेन प्रतिपद्यथ यो निशि इति द्वादशी प्रतिपदोर्निषेधादेका
दश्यादि पौर्णमास्यन्तानां तिथीनामभ्यनुज्ञानं पद्मपुराणे । सर्वदेवशयनादिकालो यथा । प्रतिपद्धनदस्योक्ता पवित्रारोपणे तिथिः । श्रियादेव्या द्वितीया तु तिथीनामुत्तमा स्मृता । तृतीया तु
भवान्याश्च चतुर्थी तत्सुतस्य तु । पंचमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च । सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी मता । मातॄणां नवमी प्रोक्ता दशमी वासुकेस्तथा । एकादशी द्वादशी च प्रो
क्ता श्री चक्रपाणिनः । त्रयोदशी त्वनंगस्य शिवस्योक्ता चतुर्दशी । मम चैव सुरश्रेष्ठ पौर्णमासी तिथिः स्मृता । यस्य यस्य तु देवस्य यन्नक्षत्रं तिथिश्च या । तस्य देवस्य तस्मिंस्तु शयनाव
र्त्तनादिके । हरिशयनादावाषाढादि विधानात्तत्साहचर्य्यादन्येषामपि देवानां तथा । ज्योतिषेपि । व्रजति यदा मिथुनं विहाय कर्कटं स तत्काराज विवर्जितां तिथिं सूर्य्यः । भवति तदा
नियतं द्विराषाढः सुरशयनविधिर्द्वितीये मासि । राज्ञा चंद्रेणावर्जितां अमावश्यां पूर्वां हि शुक्लपक्षे मिथुने संक्रान्ते शतिशेषः । हरिनाथोपाध्यायास्तु । यमः क्षीराब्धौ शेषपर्य्यंके आषाढ्यां संवि
शेद्धरिः निद्रां त्यजति कार्त्तिक्यां तयोस्तं पूजयेत्सदा । ब्रह्महत्यासमं पापं क्षिप्रमेव व्यपोहति । हिंसात्मकैस्तु किं तस्य यज्ञैः कार्य्यं महात्मनः । प्रस्वापे च प्रबोधे च पूजितो येन केशवः । आषा
ढशुक्लैकादशीमारभ्य पौर्णमासीपर्य्यन्तं विष्णोर्निद्राग्रहणरूपशयनकालः । अत एव एकादश्यां शयनमभिधाय तदादिदिनपंचके कर्म्म कथनं ब्रह्मपुराणे वराहपुराणीये तु एकादशी
कालीनमंत्रे निद्राग्रहणाभिधानं मनस्मृतौ पौर्णमास्यां शयनाभिधानं आषाढ्यां पदस्यानुपान्तु विशिष्यस्य तत्रैव प्रवृत्तेः । एवं च ब्रह्मपुराणे । यद्यप्येकादश्यां प्रबोधनमुक्तं तथापि तदा
दिदिनपंचकमेव प्रबोधसमयः । तेन वराहपुराणे । एकादश्यां प्रबोधाभिधानं यमस्मृतौ । कार्त्तिक्यां प्रबोधाभिधानं समं जसमिति । एवमेव श्रीदत्तोपाध्यायाः कल्पतरुकृतस्तु एकाद-

४६

श्यामेव शयनं प्रबोधश्चैव यत् स्मृतावाषाढीकार्त्तिकीपदं एकादशीपरं आषाढस्येयं कार्त्तिकस्येयमिति व्युत्पत्त्या न च दशाप्रत्ययापत्तिः
अपवादविषये उत्सर्गस्य क्वचित्प्रवृत्तेरित्याहुः श्रीभगवद्वाक्यं ॥ मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने । फलमूलजलाहारी हृ
दिशल्यं ममार्पयेत् । फलाहारपदं अशनगर्भं तेन सर्वथाऽनशनपरत्वं अत्र मलमासादिकृतविशेषो मलिम्लुचतत्त्वेऽनुसन्धेय
इति शिवं ॥ विरुद्धगुरुवाक्यस्य यदत्र वहु भासितं । तत् क्षन्तव्यं बुधैरेव स्मृतितत्त्वबुभुत्सया ॥ ॐ ॥ इति वन्द्यघटीयहरिहरभ
ट्टाचार्य्यात्मज रघुनन्दनभट्टाचार्य्यविरचितमेकादशीतत्त्वं समाप्तं ॥ हरिः ॐ तत्सत् इत्युच्चरेदिति ॥ ॐ नमः शिवाय ॥ ॐ ।

४६ए